आश्विनमासः
वर्षम्–६७
द्वादशोऽङ्कः
विक्रमाद: २०७३
युगाब्द: ५११८
५ अक्टूबर २०१६

ISSN 2249-698X

# भारती

संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–





आश्विने शक्तिपूजाया अनुष्ठानादनन्तरम्।
विजया दशमी लोकैः सोत्साहमभिनन्द्यते॥

## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | वैदिकवाङ्मये शक्तिः | डॉ. अनिल कुमार शर्मा | ६ |
| ५ | आदिपदार्थभूतनैयायिकमतम् | डॉ. सुरेन्द्रकुमारशर्मा | ८ |
| ६ | दशहरदशकम् | साँवरमलशास्त्री | १० |
| ७ | अनुशासनस्य महत्त्वं न विस्मरणीयम् | ममता गुप्ता | ११ |
| ८ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | १३ |
| ९ | ऋणानुबन्धः ( स्मृतिकथा ) | डॉ. हर्षदेवमाधवः | १५ |
| १० | बाबासाहेबआप्टे महोदयानां व्यक्तित्ववर्णने- | वेणीमाधव गो. धर्माधिकारी | १६ |
| ११ | प्रेरकप्रसङ्गशतकम् | मा. श्रीमती आराधना धर्माधिकारी | १७ |
| १२ | रामकुमारशर्मप्रणीतवृक्कयौतुकस्य समीक्षणम् | डॉ. कमलकान्तबालाणः | १८ |
| १३ | कार्यसिद्ध्यर्थं मन्त्राणां प्रयोगः | डॉ. महेन्द्रकुमारमिश्रा | २१ |
| १४ | संस्कृतसमाचारः | - | २४ |
| १५ | भारतीमञ्जुनिकुञ्जम् | डॉ. रामनारायण झा | २५ |
| १६ | महितो महात्मा | डॉ. प्रशस्यमित्रशास्त्री | २६ |
| १७ | प्रसिद्धशिक्षाग्रन्थेषु शब्दोच्चारणप्रक्रियायाः.... | रामचन्द्र जाटः | २७ |
| १८ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | २९ |
| १९ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३१ |
| २० | संङ्गोष्ठी वैदिकसम्मेलनं च | राजस्थान संस्कृत अकादमी | ३५ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**

दूरभाषः 0141–2379014, मो. 9783105699

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)**




।। श्रीशः ।।

ISSN2249-698X

# भारती

संस्कृत-मासपत्रिका





**प्रमुखसंरक्षकाः**

जगद्गुरवो निम्बार्कपीठाचार्याः श्रीराधासर्वेश्वरशरणदेवाचार्याः

**प्रमुखसंरक्षकाः**

जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**
स्व. परमाचार्यः
श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ
स्व. उमाकान्तकेशवआप्टे
( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
स्वामी विश्वेशतीर्थः
स्वामी सत्यमित्रानन्दगिरिः
स्वामी रामभद्राचार्यः
आचार्यः अविचलदासः
स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्यारेमोहनशर्मा

प्रबन्धसम्पादकः
सुदामाशर्मा

सहसम्पादकाः
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

आर्थिकपरामर्शदाता
ओ.पी. गोयल

पृष्ठसंयोजनम्
श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्
rajeshksharma69@gmail.com - 01414001974


## मङ्गलाचरणम्

यां ध्यायन्ति सुराः सदैव समरे जेतुं रिपूनात्मनः।
यामर्चन्ति बुधाः मुदा प्रतिदिनं विज्ञानहेतोः सदा।
छात्रा यामभिपूजयन्ति कुसुमैर्विद्यार्थिनः शारदाम्,
तां सर्वार्थसुसाधिकां भगवतीं वन्दामहे श्रेयसे।।

## मासावतरणम्

मेधैर्मुक्तिमुपागते हि गगने संशोभते चन्द्रमाः,
पन्थानः सुखपूर्वकं सुचलितुं पङ्केन शून्याः शुभाः।
मासे आश्वयुजे सुखेन तरितुं योग्यप्रवाहा नदी,
ज्योत्स्ना चन्द्रमसः शुभातिविमला संशोभते सर्वतः।।


कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

आश्विनमासः
वर्षम् 67
वार्षिकशुल्कम् 120/-

विक्रमादः 2073
अक्टूम्बर, 2016
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

अङ्कः - 12

## सम्पादकीयम्

# कश्मीर-समस्यायाः समाधानम्

...✍ पं. प्यारेमोहनशर्मा

जम्मू-कश्मीरस्य मुख्यमन्त्री महबूबा-मुफ्ती-महोदया प्रधानमन्त्रिणा नरेन्द्रमोदीमहोदयेन साकं कश्मीरसमस्याया समाधानमचिन्तयत्। सावदत् जम्मूकश्मीरे सम्प्रति सर्वत्र पृथक्तावादिनः आतङ्ककारिणश्च निरागसान् जनान् नागरिकान् शिशून् सैनिकाँश्च घ्नन्ति। अस्ति चिन्ताजनकोऽयं विषयः। सावोचत् यत् प्रधानमन्त्रिमहोदयाः सम्प्रति लोकसभायां पूर्णबहुमतेन विराजन्ते। यदि भवतां शासनकाले समस्यायाः समाधानं न भविष्यति तदा तु कदापि जन्मूकश्मीरसमस्यायाः समाधानं न भविष्यति। सा प्रधानमन्त्रिणः कार्याणां प्रशंसामकरोत्। तत्र वातावरणं दूषयितुं सा पाकिस्तानस्य पृथक्तावादिनां च निन्दामकरोत् सा तत्र समवेतान् समाचारपत्रप्रतिनिधी-नकथयत् यत् ते नैतादृशसमाचारान् प्रकाशयेयुर्यैः वातावरणं दूषितं भवेत्। सावदत् यत् कश्मीरसदृशी स्वतन्त्रता नान्यत्र कुत्रापि संलक्ष्यते पुनरपि तत्र अशान्तिः। सावदत् कस्मिन्नपि देशे नैतादृशी स्वतन्त्रता लोकेभ्यो यादृशी तत्र विद्यते। मदीयसमारोहेषु-अल्पायुषो बालकाः नृत्यन्तिस्म काननेषु मामाहूय इमे बालका एव मामरक्षन्। अद्य त एव बालकाः प्रस्तराणि प्रक्षिपन्ति। सावदत् गृहमन्त्रिणा सह तत्र यज्जातं तदतीव कष्टं प्रयच्छति। अतिथिं वयं (अल्लाहरूपं) भगवत्स्वरूपं मन्यामहे। अस्माकं गृहमन्त्रिणः पाकिस्तानमपमान-मकरोत् इति निन्दास्पदम्। सावदत् यदहं पाकिस्तानं कथयामि यत् यदि पाकिस्ताने कश्मीरजनेभ्यः किञ्चिन्मात्रमपि सौहार्दं स्नेहो वा वर्तते तर्हि सैनिकशिबिरेषु आक्रमणमवरोधयेत्। न तदर्थं पृथक्तावादिनः संप्रेरयेत्।

कश्मीरे ध्यानं रचयता पाकिस्तानेन भारतस्य विदेशसचिवः इस्लामाबादमागन्तुं नियन्त्रियतः। विदेशसचिवाय प्रेषिते पत्रे संयुक्तराष्ट्रप्रस्तावस्य चर्चा कृता। पाकिस्तानं सम्यक् जानाति यद् भारतमति-सारल्येन प्रस्तावमिदं निरस्तं विधास्यति। पूर्वमपि भारतेन तथा चरितम्। भारतं पूर्ववदेव पाकिस्तानमकथयत् यत् सर्वतः प्रथममातङ्किनः सम्पूर्णतया नश्येयुः। एते आतङ्कवादिन एव भवतां नीतिं सञ्चालयन्ति अतः प्रथममेतेषां विनशनमावश्यकम्। भारतं न केवल-मुपवेशनं न्यषेधयत् अपितु-उपवेशनस्य कृते नियमा-नघटयत् पाकिस्तानं न कदापि तान् स्वीकरोति।

भारतं न कदापि पूर्वं तथाकरोत्। यदि भारतं तथा कर्तुं सफलोऽभविष्यत् तदा तु निश्चितरूपेण कश्मीरविषये भारतस्य रणनीतिः सफलाऽभविष्यत्। सम्पूर्णप्रकरणे तथा सावधानता विधेया। नरेन्द्रमोदीमहोदयः 2016 वर्षानन्तरं पाकिस्तानविषये समये नीतौ परिवर्तन-मकरोत्, परन्तु न तथा विधेयम्। कूटनीतिस्तरे श्रेष्ठमिदं भविष्यति यद् बलूचिस्तानं मानवाधिकारप्रकरणं

निरन्तरमुत्त्थापयेत्। पाकिस्तानं प्रान्तविषये मौनमेव साधयेत्। यदि बलूचराष्ट्रवादी मोदीमहोदयस्य कथनं मानयति तर्हि तत् तेषां दृष्टिकोणं वर्तते। विश्वस्य महत्यः शक्तयः अन्यदेशेषु मानवाधिकारहननमादाय निरन्तरं दार्ढ्येन वदन्ति अधुना ते देशाः बलूचिस्तानस्य स्थितिः कीदृशी भवेदिति तर्कस्य सम्मुखे आत्मानं समुपस्थापयिष्यन्ति। यदि अधुना मोदीमहोदयाः पाकिस्तानेन सह सामान्यसम्बन्धं विधातुमग्रेसरन्ति तदा तेषां विश्वसनीयता समाप्तिमेष्यति। अतः सम्प्रति कूटनीतिकौशलस्यावश्यकता विद्यते।

किमधुना पाकिस्तानं सर्वं विस्मृत्य-आतङ्कवाद-संरक्षणस्य स्वकीयं प्राचीनं षड्यन्त्रं पुनरपि नैरन्तर्येण रचयिष्यति? पाकिस्तानस्य व्यवहार उमुभयोर्देशयोः सम्बन्धान्तरं निर्धारयिष्यति।

मोदीमहोदयस्य विदेशनीतेः आधारो वर्तते पाकिस्तानकृते प्रतिपदं काठिन्योपस्थापनम्। आलोचकाः इमां नीतिं न श्रेष्ठां मन्वते। परन्तु मोदी प्रायः पाकिस्तानमादाय आश्चर्योत्पादकं पदं स्थापयति। यथा सहसा विदेशसचिवानामुपवेशनं निरस्तमकरोत्। स्वयं सहसा लाहोरमगच्छत्। स्वतन्त्रतादिवसावसरे प्रदत्तं भाषणमपि अनया दृष्ट्या एव लोकाः पश्यन्ति।

अत्रैकः प्रश्नः समुदेति किं पूर्वं सप्ततिवर्षेषु आतंकवादस्यावरोधने वयं समर्थाः संजाताः ? प्रत्युत्तरं वर्तते नकारात्मकम्। पाकिस्तानसदृशदेशेन सह यथास्थितिवादात्मिका नीतिर्न कदापि सफला भवितुं शक्नोति। अतो निम्नाङ्कितानि त्रीणि परिवर्तनानि भविष्यन्ति-

(1) बलूचिस्तान, पीओके तथा गिलगित बालतिस्तानेषु मानवाधिकारोल्लङ्घनं तथा निम्नं जीवनस्तरं वैश्विकपटले सम्मुखे समायास्यति।

(2) कूटनीतिक-नैतिक-राजनैतिकसमर्थनेन (सेमीनार) संगोष्ठी आयोजनेन तत्रत्यानां जनानां समस्याः प्रकाशमेष्यन्ति।

(3) भारतीयदूरदर्शनेषु गिलगित स्काई मुजफ्फराबादानां सामयिकं तापमानं प्रतिदिनं प्रदर्शनीयम्। येन-एषु क्षेत्रेषु भारतीयोऽधिकारः पुष्टिमेष्यति।

भारतपाकसम्बन्धाः प्रभाविताः भविष्यन्ति। केचन विशेषज्ञा मन्यन्ते यद् भारतं पाकिस्तानकृते स्वकीयां नीतिं षण्मासेषु फलितां द्रक्ष्यति। यतोहि सम्प्रति पाकिस्तानस्याभ्यन्तरिकस्थितिर्नैव सामान्या, प्रतिपलं तत्रोत्त्थानपतनानि भवन्ति।

भ्रष्टाचारमादाय प्रधानमन्त्रिणि नवाजशरीफे निरन्तरं समधिकं कष्टप्रदं वातावरणं विद्यते।

पाकिस्तानस्य नवीनः सेनाध्यक्षो नवम्बरमासे निर्वाचितो भविष्यति। पाकिस्तानस्य सेनायाः ध्यानं सम्प्रति कबाइलीवसतिषु विद्यते। आन्तरिकरूपेणापि आतङ्कः एव सर्वत्र प्रसृतो विद्यते। अर्थव्यवस्थापि समीचीना न विद्यते। निर्यातं क्षीयते।

पाकिस्तानेन सह आर्थिकविषयेषु शैथिल्येन चीनोऽपि कुपितो विद्यते। अतः पाकिस्तानं सम्प्रति भारतेन सह पौनःपुन्येन वार्ताप्रस्तावं त्यक्ष्यति। अतः कूटनीतिज्ञाः कथयन्ति यदस्यां स्थितौ पाकिस्तानं न कथमपि सुस्थिरं भवेदित्येव भारतं निरन्तरमाचरेत्।

# वैदिकवाङ्मये शक्तिः

❑ डॉ. अनिल कुमार शर्मा

शक्तिरिति शब्दस्य व्युत्पत्तिः शक्लृ शक्तौ धातोः स्त्रीत्वविवक्षायां ''स्त्रियाँ'' क्तिन्निति पाणिनीयसूत्रेण क्तिन्-प्रत्यय-करणेन भवति। शक्तिशब्दोऽयं नानार्थेषूपलभ्यते कोषग्रन्थेषु यथा-द्रविणं, बलं, शौर्यं, पराक्रमः, प्राणाः, योग्यता, धारिता, सामर्थ्यं, दैवशक्तिः, ऊर्जा, देवपत्नी, देवी, भंग, दिव्यता, बर्छी, शूलं, भल्लः, शब्दशक्तिः (अभिधादयः), स्त्रियाः जननेन्द्रियः शाक्तसम्प्रदायस्य जनैः पूज्यमाना शिवलिङ्गमूर्तिश्चेत्यादयः। देव्यर्थे शक्त्याः गणना विविधप्रकारेण क्रियते क्वचिद्यथा अष्टरूपेषु क्वचिन्नवरूपेषु क्वचिच्च एकपञ्चाशच्छक्तिपीठ-रूपेषु।

भारतीयेयं जनप्रज्ञा शक्त्युपासनां तावतीमेव पुराणीम् अङ्गीकरोति यावतीं विश्ववाङ्मये सर्वप्राचीनां वेदरचनामपौरुषेयाम्। कारणेनैतेनैव ऋग्वेदे इन्द्रेण सह इन्द्राण्याः वरुणेन समं वरुणान्याः, यमेन साकं यम्याः, सूर्येण सममूषायाः, विष्णुना समं श्रियः, अग्निना सह स्वाहायाः रुद्रेण सह रुद्राण्याश्च समभावेनोपासना विहिताऽस्ति। शक्तिरिति तत्तत्त्वं येन काचिदपि व्यक्तिः यत्किमपि विधातुं शक्ता भवति। यथा वाक्ये क्रियायाः सांख्ये प्रकृत्याः प्राधान्यं सर्वैरङ्गीकृतं तथा सर्वत्रापि लोकव्यवहारे शक्तितत्त्वं प्रामुख्यमभजत। मनीषिणां दृष्ट्यां वेदेषु, तन्त्रेषु, व्याकरणेषु, स्थापत्ये, साधनासु, सगुण-निर्गुणेतिद्विविधोपासनयोः, लौकिकालौकिके वा जीवने सर्वत्रापि शक्त्याः प्राधान्यमूरीकृतम्। पौराणिकसाहित्यान्तर्गतमस्याः शक्त्याः स्वरूपं क्वचित् देवाङ्गनाभिः क्वचिद्वा अप्सरोभिः गृहीतम् इत्थमेव कुत्रचित् परा वाणी, काली, दुर्गा, श्रद्धा, सावित्री, माया, सीताऽनसूयेति च सञ्ज्ञावतीभिः नारीभिः। लक्ष्मी-अन्नपूर्णा-सरस्वती-पृथ्वी-रात्रि-पीताम्बरा-बगलामुखी-राजराजेश्वरीभगवती त्रिपुरसुन्दरी-भुवनेश्वरीति दशमहाविद्यानामाराधनाऽपि शक्त्युपासनैव। यथा एकमेव परब्रह्म विविधरूपेषु भासते। ''**एकं सद्विप्राः बहुधा वदन्ति**'' इति वैदिकसिद्धान्तमनुसरत् शक्तित्त्वम्- ''**एकोऽहं बहु स्याम्**'' इति कामयमानं विविधस्वरूपेषु भासते। वस्तुतः शक्तितत्त्वं ब्रह्मवत् नानास्वरूपेषु भासमानमपि एकमेव।

**अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः।**
**अहं मित्रावरुणोभा विभर्म्यहमिन्द्राग्नी अहमश्विनोभा।।**

इति ऋङ्मन्त्रे देवी ब्रूते यदहं रुद्रस्वरूपैः वसुस्वरूपैश्च विचरामि। अहम् आदित्यरूपैः विश्वेदेवैश्च स्वरूपैः निवसामि। अहं मित्रावरुणोभा धरामि अहमेव च इन्द्रस्य, अश्विनीकुमारयोश्च आधारभूमिरस्मि। एतेनैव प्रमाणीक्रियते यच्छक्ति-तत्त्वेनैव अखिलोऽयं ब्रह्माण्डः चराचरत्वं भजते। शक्तितत्त्वाभावे तस्याः नानारूपता कथं सेत्स्यति। तदभावे विष्णोः विष्णुत्वं शिवस्य शिवत्वं ब्रह्मणश्च ब्रह्मत्वं कल्पितुमेव न शक्यते एवम् वागर्थस्वरूपिणः शिवस्य अर्द्धनारीश्वरस्वरूप-मपि भवितुं नार्हति। जडतत्त्वानां जडता चेतनानां वा चेतनता एतेषां सर्वेषामपि अस्तित्त्वं शक्तिकारणादेव। रामकृष्णादिभिः देवैरपि शक्त्युपासना कृता। आद्यशङ्कराचार्योऽपि शक्त्युपासनायां ''सौन्दर्य-

लहरीति'' स्तवनकाव्यमरचयत्। सांख्यदर्शनेऽपि भगवान् कपिलः।

**पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।**
**पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः।**

इत्युक्त्या् प्रकृतिरूपायाः शक्त्याः महत्त्व-मङ्गीचकार।

शक्त्युपासनायाः भेदाधारेणैव तस्याः वाहनास्त्र-शस्त्रालङ्कारकार्यनाम्नां विधानं विहितं शास्त्रेषु। देवी-भागवत-देवीपुराणसदृशवृहद्ग्रन्थेष्वपि शक्त्यु-पासनाविषयकं गूढचिन्तनं विहितमिति दृश्यते। शक्तिरियं कारणब्रह्मस्वरूपा, मायाशबलविग्रहा, साम्यावस्थात्मिका, सर्वदेवमयी, सर्वजडमयी, सर्वचेतनमयी, इच्छाज्ञानक्रियान्विता, लज्जा, तुष्टिः, कीर्तिः, क्षमा, दया, जया, शिवा विजयादिस्वरूपा वर्तते। इयमेव धारणा, प्राणवायुरूपा, शब्दरूपिणी, प्रकाशवती, जठराग्निधारिणी, कायहेतु मूला-धारावासिनी, पुस्तकधारिणी, पापमोचनी, अमृतदात्री, ज्ञानप्रकाशयित्री दारिद्र्यदुःखनाशिनी, जगत्पालनकर्त्री ज्ञानमूर्तिश्चेत्यादिभिः विशेषणैः अन्विता वर्तते।

चतुर्भिः वेदैः, अष्टादशपुराणैः, आरण्यकग्रन्थैः, ब्राह्मणग्रन्थैः, उपनिषद्भिः, सांख्ययोगमीमांसादि-दर्शनैः स्मृतिग्रन्थैः वेदाङ्गादिभिश्च शक्तितत्त्वस्य प्राधान्यम् ऊरीकृतम्। या देवी लोकव्यवहारे मातृस्वसृपत्न्यादिरूपा सती जगदुपकरोति सञ्चालयति च, परन्तु महतः कष्टस्य विषयोऽयं यद्वयं शक्तिपुञ्जभूतां नारीं केवलं भोग्यवस्तु स्वीकुर्मः। सर्वत्रैव अद्य नारी कामसाधिका एवास्माभिर्दृश्यते, इत्यस्माकं दृग्दोषस्तादृशः यस्य निवारणं कृष्णयजुर्वेदीया चाक्षुषीविद्याऽपि कर्तुं नार्हति। वयं विस्मरामः यद् नारीशक्तिः न केवलं कामसाधिका अपितु सा धर्मार्थमोक्षरूपत्रिविधपुरुषार्थसाधिकापि वर्तते। वर्तमानसमये अस्माकं भौतिकोन्नतिसम्बन्धिन्या विचारधारया शक्त्याः तात्पर्यमेव परिवर्तितम्। मनूक्तं **यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः। यत्रैतास्तु न पूज्यन्ते सर्वास्तयाऽफलाः क्रियाः।** इति स्मृतिवचनं मनसा अङ्गीकृत्य तत्प्राधान्यम् ऊरीकृत्य च सम्यक्तया अस्माभिः स्वस्मृतिपटले स्थापनीयं तदनुगुणमेव च व्यवहरणीयम्।

महद्दुर्भाग्यस्य विषयोऽयं यद्यस्मिन्देशे वेदादिभिः यस्याः सम्माने वृद्धिः कृता। तत्रैव कैश्चित् पितृभिः, भ्रातृभिः, पतिभिः, विविधक्षेत्रेषु लग्नैः कर्मकरैर्यथा अध्यापकसमाजसेवक-नेतृ-अभिनेतृ-व्यापारलग्नैर्दु-श्चरित्रैः कामकीटैः अस्माकं बालाः अपि दूषिताः क्रियन्ते। ताः सर्वतः कुत्सिताः सत्यः स्वसामर्थ्यमपि (स्वप्रचण्डकालीस्वरूपम्) विस्मृतवत्यः। अद्य भारते स्त्रीशिक्षायाः अनुपातः सन्तुष्टिजनकः नास्ति। ''**स्त्री पठित्वा किं करिष्यति भोजनमेव तु पक्ष्यति**'' इति दुष्टवचनानि श्रुत्वा अद्यापि अस्माकं शक्तिस्वरूपा नारी कष्टमनुभवति। न जाने कदा उक्तदूषितविचारैः कथनैः च नारी विमुक्ता भविष्यति। अस्माभिः बालिका-शिक्षायै यत्नः विधातव्यः। कुत्सिता मानसिकता सर्वैः त्यक्तव्या। सर्वविधप्रयासैरपि शक्तिः स्वकीयं मौलिकं स्वरूपमद्यावधि न प्राप्तवती। यदा शक्तिः शिक्षा-खड्गालङ्कृता भविष्यति तदैव सा स्वप्राप्तव्य-सम्माननं प्रारप्स्यति। अस्माभिः सर्वैरेव एतत्कृते यतनीयम्।।

**प्राध्यापकः**
**प्रशिक्षण प्रकोष्ठः, निदेशालय संस्कृत-शिक्षा, जयपुरम्**

# आदिपदार्थभूतनैयायिकमतम्

❑ डॉ. सुरेन्द्रकुमारशर्मा

**व्यापारो भावना सैवोत्पादना सैव च क्रिया।** इति कारिकावतरणग्रन्थे प्राभाकरादीन् प्रति व्यवस्थापयति इति ग्रन्थे आदिपदेन नैयायिकसङ्ग्रहः इति सर्वैः व्याख्यातम्। परन्त्वत्र खण्ड्यमाननैयायिकमतस्वरूप-प्रदर्शनेऽपि अस्ति बहुवैषम्यम्। विषयेऽस्मिन् प्रथमं काशिकाकारमतं पश्यामः – फलं धात्वर्थः यत्नः (कृतिः) आख्यातार्थः इति प्राचीननैयायिकमतं पर्यवसन्नम्। यत्नत्वं धातुशक्यतावच्छेदकमिति तु नार्थः। तथा सति प्रत्ययस्याश्रयार्थकत्वापत्तेः। तच्च न नैयायिकाभिमतम् इत्यादिना मण्डनमिश्रमततुल्य-मन्यन्नैयाय्यिकमतमेवात्रादिपदार्थ इति व्याख्यातम्। दर्पणकारास्तावत्[5] 'यद्यपि व्यापारो धात्वर्थत्वेन नैयायिकसम्मतः तथापि नासौ तन्मते भावनापदव्यपदेश्य इति भावः' प्राचीननवीननैयायिकमतसामञ्जस्येन सर्वमपि नैयायिकमतमत्र खण्ड्यते इति सूचितवन्तः।

प्रभाव्याख्याकारैः काशिकावचनमेव अनुसृतमस्ति। तत्त्वदर्शिनीकारैः[1] 'तिङन्ते कृतिरेव वाच्या लाघवात् न व्यापारो गौरवात् इति नैयायिकाशयस्यैव प्रकृतसन्दर्भे निराक्रियमाणत्वात्' इत्यादिना नैयायिकमतं प्रदर्शितम्। अथापि फलं धात्वर्थः यत्नः आख्यातार्थः इति नैयायिकमतं कुत्रापि नास्ति इति काशिकाकार-वचनखण्डनं कृतं वर्तते। कृष्णमित्रास्तु[2] आदिपदेन मण्डनमिश्रमतं स्वीकृत्य तदेव व्यापारो भावनेत्यादिना निराक्रियत इत्युक्तवन्तः।'अयमेव नैयायिकमतखण्डन-परतया अपि व्याख्यातुं शक्यते। तच्चेत्थम् – पचति पाकं करोति इति विवरणात् भावनायाः वाच्यत्वं लब्धम्। तत्राख्यातस्य कर्तरि शक्तेः परिशेषाद्भावना धातुवाच्येत्यर्थः' इति नैयायिकमतखण्डनपरत्वमपि प्रतिपादितवन्तः।

न्यायकुसुमाञ्जलेः पञ्चमस्तबके दशमकारिका-व्याख्यायां 'धातूनां क्रियाफलमात्रवाचित्वात्' इत्यादिना एवम् एतद्व्याख्यानानां प्रकाशे[3]- आमोद[4]-बोधिनी[5]-विवेकानां[6] आख्यातवाद[7] दीधितेश्च पर्यालोचनया फलं धात्वर्थः, यत्नः (कृतिः) आख्यातार्थः इति नैयायिक-मतमप्यस्तीत्यवगम्यते। एतदेव मतमत्रादिपदेना-भिप्रेतमिति कथनमेव युक्तम्। बृहद्वैयाकरणभूषणेऽपि[8] प्रकाशव्याख्यायां वर्धमानेन प्रदर्शितमिदमेव मतम् अक्षरशः अनूदितम्। यद्यपि एतन्मतं न सर्वनैयायिक-सम्मतमथापि कुसुमाञ्जलिकारस्य उदयनाचार्यस्य इदमेव मतम् अभिप्रेतमिति ज्ञायते। अतः काशिकाप्रभादीनां व्याख्या उचिता। तिङन्ते भावना वाच्यैव नेति प्राभाकरमतम्, तिङन्ते कृतिरेव वाच्या न व्यापारः इति नैयायिकमतञ्च व्यापारो भावनेति कारिकया निराक्रियते इति व्याख्याया एव युक्तत्वाच्च। एवञ्च लडाद्यन्तपदस्य तद्गुणसंविज्ञानबहुव्रीहित्वमेव इति सुस्पष्टम्।

यद्यपि तत्त्वदर्शिन्यां तिङन्ते कृतिरेव वाच्या, न व्यापार इति नैयायिकमतखण्डनपरतैवास्याः कारिकायाः प्रतिपादिता अथापि फलं धात्वर्थः कृतिराख्यातार्थः इति मतं नास्तीति प्रभाकारादीनां वचनस्यायुक्तता प्रतिपादिता। एतेषां मतेन धात्वर्थोऽपि यत्नः आख्यातार्थोऽपि यत्न एवेति वक्तव्यम्। तथा चासङ्गतिः। एतत्सर्वं विविच्यैव काशिकाकारैरुक्तम्-'यत्नत्वं धातुशक्यतावच्छेदकम् इति नार्थः। तथा सति प्रत्ययस्य आश्रयार्थकत्वापत्तेः' इति। न केनापि नैयायिकेन आख्यातास्य कृतिवाचकत्वं त्यज्यते। अतः तत्त्वदर्शिन्यां नैयायिकमतं स्पष्टतया न प्रतिपादितम् इत्येव वक्तव्यं भवति।

वाचित्वं दूषयति कृञ इति। अयंभावः –

**व्यापारो भावना सैवोत्पादना सैव च क्रिया।**

**कृञोऽकर्मकतापत्तेर्न हि यत्नोऽर्थ इष्यते।।** इति कारिकाया: व्याख्यांशत्वेन दृश्यते इयं पङ्क्ति: भूषणसारस्य मूले 'जानाति करोत्यादे: केवलज्ञान-यत्नादिक्रियामात्रवाचित्वं दूषयति कृञ इति। मूलस्यास्य काशिकाकार:[1] इत्थं करोति विस्फोरणम् –

''फलावाचकत्वेऽपि फलव्यधिकरणव्यापार-वाचित्वं सकर्मकत्वं कृञादेरप्यक्षतमेव उत्पत्त्यादि-रूपफलव्यधिकरणयत्नाद्यात्मकव्यापारवाचकत्वादित्यत आह– अयं भाव: इति।

दर्पणकार: तावत् 'मात्रपदेन फलव्यवच्छेद:। सकर्मकाणां प्रायश: फलावच्छिन्नव्यापारवाचकत्वं विशकलितफलव्यापारोभयवाचकत्वं वा, जानातीत्या-दीनान्तु ज्ञानादिव्यापारार्थकत्वमेव। अकर्मकाणान्तु सर्वेषां न फलार्थकत्वम्। तस्य ततोऽननुभवात्। किन्तु व्यपारार्थकत्वमेवेति प्राचीननैयायिकाभ्युपगमात्, वक्ष्यमाणरीत्या कृञ: फलार्थकत्वे तु तुल्यन्यायात् सर्वेषामेव तत्सिद्धिरिति भाव:। ननु कृञ: फलावाचकत्वे कथमकर्मकत्वमत आह– अयं भाव: इति इत्युल्लिलेख। प्रभाकरेण काशिकाया: एव अनुसरणं कृतं वर्तते। 'यद्वा द्वितीयाद्यर्थफलान्वय्यर्थकत्वं सकर्मकत्वम्, द्वितीया-दीनामेव फलार्थकत्वाददोष इत्यत आह– अयं भाव: इति' इत्यन्त: अवतरणग्रन्था दृश्यते प्रभायाम्।

तत्त्वदर्शिनीकारास्तावत्[1]–नैयायिकेति। सर्वनैयायि-केत्यर्थ:। केवलयत्नेति केवलमात्रोभयपदोपादानेन जानात्यादेर्धातो: सर्वेऽपि नैयायिका: फलवाचित्वं नाभ्युपयन्ति, तदुत्तरकर्मप्रत्ययस्यापि फलवाचित्वं नाङ्गीकुर्वन्तीति द्योतयति। ननु कृञ: फलावाचकत्वे कथं सकर्मत्वम् अत आह– अयं भाव इति तत्त्वदर्शिन्याम् अलिखन्।

परिशीलनेन विज्ञायते यत् तत्त्वदर्शिनी दर्पणानुगामिनी। प्रभा तु काशिकानुगामिनीत्युपर्येवो-ल्लिखितम्। गुरवो मदीया इत्थमभिप्रयन्ति विषयेऽस्मिन् स्वग्रन्थे भूषणसारतत्त्वप्रकाशिकाख्ये–

**''अत्र च दर्पणव्याख्या तदनुसारिणी तत्त्वदर्शिनी व्याख्या च युक्ते इति।**

अत्र कारणमिदम्– प्रस्तुते खण्ड्यमानं मतं न प्राचीननैयायिकमतम्। तेषां मते स्वार्थफलव्यधिकरण व्यापारवाचित्वरूपसकर्मकलक्षणस्य वक्तुमशक्यत्वात् तल्लक्षणाव्याप्ते: दोषतयोपन्यासायोगात्। तस्मात् नव्य-नैयायिकानां मतमेवात्र निराक्रियते। यैश्च गच्छत्यादिषु फलव्यापारोभयार्थकतामङ्गीकृत्य स्वार्थफलव्यधि-करणव्यापारवाचित्वरूपं सकर्मकत्वम् अङ्गीक्रियते तैरपि दीधितिकारादिभि: सविषयकधातूनां केवलव्यापारार्थ-कतैवाङ्गीक्रियते इति तन्मतखण्डनपरोऽयं ग्रन्थ:। न तु फलं द्वितीयार्थ: व्यापारो धात्वर्थ इति नैयायिकमत-खण्डनपर:। अत्र दर्पणे स्थितं प्राचीननैयायिकाभ्यु-पगमादिति वाक्यगतं प्राचीनपदम् अयुक्तं प्रक्षिप्तभूतं भाव्यते। यत: तत्र प्रदर्शितस्य मतस्य प्राचीननैयायिक-मतत्वासंभवात्।

वस्तुत: योऽपि काशिकाग्रन्थ: 'अयम्भाव:' इत्यस्यावतरणपर: सोऽपि नातीव रुचिर:। सर्वेषामपि धातूनां यत्किञ्चित्फलव्यधिकरणव्यापारवाचित्व-स्योपपादयितुं शक्यत्वे सकर्मकत्वापत्त्या स्वार्थफल-व्यधिकरणव्यापारवाचित्वस्योपपादयितुं शक्यत्व-सकर्मकत्वापत्त्या स्वार्थफलव्यधिकरणवाचित्वं सकर्मकत्वमित्यस्यैव स्वीकार्यत्वात्। अथ अनेन ग्रन्थेन प्राचीननैयायिकमतमपि खण्डितप्रायमिति चेत् भवतु। परन्तु तत्र मुख्यमुद्देश्यमत्रेति भूषणग्रन्थस्य सम्यक् अवलोकनेन ज्ञायते।

**प्राचार्य:**

**श्री दादू आचार्य-संस्कृतमहाविद्यालय:, जयपुरम्**

# दशहरदशकम्

❑ साँवरमलशास्त्री

( 1 ) मूर्च्छानन्तरं लक्ष्मणस्य प्रेरणा -

सौमित्रः परिलभ्य चेतनमुदं, सञ्जीवनीसेवया
रामं खेदयुजं विलोक्य सहसा, नत्वा बभाषे प्रियम्
भो भ्रातः! शरणागतं गतभयं, कृत्वा प्रतिज्ञातवान्
सूर्यास्तान्ननु प्राग्घि रावणवधः, सङ्कल्पितश्चिन्त्यताम्।

( 2 ) इन्द्रेण दिव्यास्त्रमातलिसहितो रथः सम्प्रेषित :-

लङ्कायामवलोक्य वानरचमूं, रामं पदातिं प्रभुम्
देवेन्द्रो हरिताश्वसंयुतरथं, सम्प्राहिणोन्मातलिम्
दिव्यास्त्रैः परिपूरिते सुरपतेः, याने स्थितो राघवः
युद्धं घोरतमं चकार तुमुलं, नासौ मृतो रावणः।

( 3 ) रामवियुक्तायाः सीतायाः वेदना-

सीता रामवियोग-दुःखगलिता, शोकाग्निना दह्यते
आगत्य त्रिजटा विदेहतनयां, पप्रच्छ तत्कारणम्
हे सीते! तव कीदृशी स्थितिरियं, केनासि सन्ताडिता
मो मातः! न शशाक रावणवधं, कर्तुं पतिर्मामकः।

( 4 ) त्रिजटा ( 5 ) पद्यद्वयेन रावणवधविलम्बकारणं विविच्य सीतां सान्त्वयते -

सीता तिष्ठति रावणस्य हृदये, सीतानुरागान्विते
सीतायाः हृदये सदा रघुपतेः, वासोऽस्ति निर्धारितः
चित्ते दाशरथेः ललामवसुधा, ब्रह्माण्डपूर्णो घटः
सीतायाः हननाद् भवेद्धि सकल-ब्रह्माण्डनाशो ध्रुवम्।

रामो वै लवितुं शिरासि यतते, सीतां खलो विस्मरेत्
वैक्लव्यंगमितस्य रावणहृदः, सीता सदा निःसरेत्
सीताशून्यहृदं छिनत्ति विशिखैः, रामः सुधाशोषकैः
वैदेही लभतां सदा सुखकरं, रामं कृपालुं विभुम्।

( 6 ) कुपितो रामो रावणं रणभूमितः परावर्तयत्-

संग्रामे पुरतो निशाचरपतेः, दृष्ट्वा रथं सायुधम्
रामः कोपसमाकुलः समभवत्, शत्रुं विलोक्याहवे
नारीचोर-कुलघ्न-नीच-कपटी, नाऽसौ रणे शोभते
कृत्वा तं ननु रावणं गतधियं, युद्धात्परावर्तयत्।

( 7 ) रावणः स्वसारथिं भर्त्सयाञ्चक्रे-

क्रुद्धोऽभूत् खलु रावणोऽनलनिभः, सूतं तथाऽतर्जयत्
अद्याहं भवितास्मि राक्षसकुले, लङ्काभुवः लाञ्छनम्
नाहं कापुरुषो भवामि समरे, कार्पण्यभावङ्गतः
शीघ्रं मां समराङ्गणं नयतु वै, योत्स्ये मरिष्यामि वा।

( 8 ) छिन्नेष्वपि मस्तकेषु पुनःशिरसामाविर्भाव :-

रामश्छेदयते शिरांसि बहुधा, शूलैश्च तीक्ष्णैः, शरैः
देहाद्वै पुनरेव रावाणशिरो, जातं यथा-पूर्ववत्
जिष्णुः दाशरथिः विभीषणमुखं, दृष्ट्वा जगाद प्रियम्
आश्चर्यं खलु दृश्यते महदिदं, लङ्कापतिर्मायिकः।

( 9 ) विभीषणेन रहस्योद्धाटनम् -

ऊचे भक्तविभीषणेन सुधिया, गुप्तं रहस्यं वचः
पीयूषो मम भ्रातृनाभिसदने, मृत्युञ्जयो विद्यते
पूर्वं शोषय नाभिकुण्डनिहितां, प्राणाधिवासां सुधाम्
तत्पश्चात् स मरिष्यति दशमुखः, लोकः सुखं प्राप्स्यति।

( 10 ) धर्मेण पापं जितम्-

सङ्ख्यं क्रूरतमं बभूव भयदं, दोलायिता मेदिनी
श्रीरामं विनयेन मातलिरयं, ब्रह्मास्त्रमस्मारयत्
श्रुत्वा तद्वचनं निकाममुदितः दृष्ट्वा पुरः सायकम्।
रामस्तेन चकार रावणवधं, ''धर्मेण पापं जितम्''

विजयच्छाया, कालाडेरा, जयपुर ( राज . )

# अनुशासनस्य महत्त्वं न विस्मरणीयम्

❑ ममता गुप्ता

मानवजीवननिर्माणाय ये गुणाः नितरामपेक्षिताः सन्ति, तेषु अनुशासनं मूर्धन्यस्थाने वर्तते। अनु-उपसर्गपूर्वक 'शास्' धातोः ल्युट्प्रत्ययकरणेन अनुशासनशब्दः सिद्ध्यति। संयमः वा आत्मनियन्त्रणम् एतस्य शाब्दिकः अर्थः। व्यावहारिकदृष्ट्या तेषां नियमानां पालनम् अनुशासनम् अभिहितम्, ये मानवसमाजस्य हितार्थमेव निर्मिताः। सूक्ष्मदृष्ट्या इयं समग्रा सृष्टिरेव अनुशासनबद्धा प्रतीयते। अनुशासन-कारणेनैव विभिन्नानां यन्त्राणां परिचालनं भवति। विज्ञानादिविविधविषयाणां मर्मज्ञताऽपि एतत्-कारणेनैव। राजकीयकार्यालयेषु अनुशासनकारणेनैव वेतनोपजीविनः समयात्प्रागेव गच्छन्ति, बाष्पगन्त्रीं समयेन चालयन्ति, अन्यानि बहूनि कार्याणि व्यवस्थानुसारेण कुर्वन्ति जनाः। अत एव संसारस्य आधारः अनुशासनमेव वर्तते। अस्य सुरक्षा पालनम् वा अनुशासनेन एव भवितुं शक्यम्। दार्शनिकाः स्वीकुर्वन्ति यत् सत्वरजस्तमांसि मिलित्वा जगत् रचयन्ति। प्रकृतौ सर्वे पदार्थाः अनुशासनबद्धाः सन्ति। यथा सूर्यः अनुशासनेन संसारं प्रकाशयति, चन्द्रः नक्षत्राणि च अनुशासनं पालयन्ति। पृथ्वी अनुशासनयुक्ता सती जीवनं धारयति। अस्यां निखिलायां व्यवस्थायाम् अनुशासनं निहितमास्ते। अत एव न केवलं सामान्यव्यवहारे अनुशासनस्य महत्त्वमपितु राज्यसंचालने, राष्ट्रसंचालने चानुशासन-गौरवमेव जागर्ति। सैनिकाः देशरक्षार्थं स्वात्मानं तृणवत्पातयन्ति। ते न गणयन्ति दुःख-पयोधिं, न स्मरन्ति प्रियशिशून्। तत्र कारणमिदमेव यत्तेऽनुशासने स्थिराः सन्ति।

मनुष्यस्य सुखदजीवनाय अनुशासनम् अनिवार्य-तत्त्वम्। अनेन मनुष्यः सर्वाणि सुखानि प्राप्नोति, शान्तिमधिगच्छति। यथोक्तं भगवता मनुना-

**'आपदां कथितः पन्था इन्द्रियाणामसंयमः।**
**तज्जयः सम्पदां मार्गो येनेष्टं तेन गम्यताम्।।'**

प्राचीनकाले भारते अनुशासनस्य कृते इन्द्रियजयशब्दः प्रयुज्यते स्म। भारतीयैः इन्द्रियविजयं विधाय किं किं नासादितम्। भारतीययोगस्य आधारः इन्द्रियजयः अर्थात् अनुशासनम् एवास्ति। अत एवोक्तं शंकराचार्येण-

**''जितं जगत् केन मनो हि येन''**

सामान्य-जनोऽपि अनुशासनमवलम्ब्य महापुरुषः संजायते। अस्य बलेन तस्मिन् महती शक्तिरुत्पद्यते। भौतिकीमुन्नतिम् अवाप्तुमपि अनुशासनमेव अपेक्ष्यते। अस्माकं देशे यदा अनुशासनस्य पालनम् अभवत्, तदायं देशः उन्नतिशिखरम् आरूढः। सम्प्रति तु अस्य श्लाघनीयगुणस्य अत्र महती अपेक्षा वर्तते। प्रायः जीवनस्य सर्वेषु एव क्षेत्रेषु अस्य अभावः उपेक्षा वा दृश्यते। नगरेषु छात्राणामुपद्रववेलायाम् अनुशासन-

हीनता शब्दस्य प्रयोगो बहुवारं कर्णगोचरीक्रियते नागरिकैः। परस्परं कलहे संजाते राज्यसर्वकारं भर्त्सयन्ति जनाः, यदत्रानुशासनाभावः। बहवोऽबुद्धयोऽपि अनुशासन-शैथिल्यकारणेन स्वकीयममूल्यजीवनरत्नमपि परित्यजन्ति, किम्बहुना अनुशासनाभावे धनरक्षणं-सुतरक्षणं-स्वात्मरक्षणा-दिकञ्च सर्वमपि अध्रुवं भवति। यदि गेहे बालकः पित्रोः आज्ञापालनं न करोति, तदा स्पष्टमेवानुशासनहीनता। गुरुकुलेषु, विद्यालयेषु, पाठशालासु, विश्वविद्यालयेषु चाव्यवस्थायां मूलकारणमनुशासनहीनतैव।

अयं महद्दुःखस्य विषयो वर्तते यत् भारतस्य प्रशासनेऽपि अनुशासनहीनता व्याप्तास्ति। अनुशासनेन हीनाः, चरित्रेण भ्रष्टाः नेतारः भारतीयां राजनीतिम् अधोगतिं प्रति नयन्ति। धनप्राप्तये ते दस्यून् संरक्षन्ति, निःसहायान् ताडयन्ति। किम्बहुना परदाराणां कुमारिकाणां च शीलभंगकरणे न लज्जन्ते। यदा रक्षका एव भक्षकास्तदा का कथा सामान्यमानवेषु अनुशासनस्य। संविधानसंरक्षकाः निर्मातारोऽपि अनुशासनहीनानामुत्साहवर्धकाः।

अधुना कार्यालयेषु अपि अनुशासनहीनतायाः चरमसीमा अवलोक्यते, यथा- चिकित्सालयेषु, न्यायालयेषु, राजकीयकार्यालयेषु, व्यापारिकसंस्था-नेषु, क्रीडास्पर्धासु, उत्पादप्रतिष्ठानेषु, शिक्षालयेषु, प्रशासनिकसेवासु किंवा विधानसभासु लोकसभासु चापि अनुशासनरहितानां कर्मचारिणां मनसि स्वकर्त्तव्यं प्रति महती उपेक्षा वर्तते। यद्यपि ते ''अहर्निशं सेवामहे'' इति घोषयन्ति परन्तु सुविधाशुल्कं विना किमपि कार्यं न कुर्वन्ति। सुविधाशुल्क-ग्रहणेन तेषां जीवने पदे पदे असन्तोषः तथा अवसादाः द्रष्टुं शक्यन्ते। प्रायस्ते रुदन्ति एव, केचिद् हसन्तः दृश्यन्ते किन्तु तद् हसनं क्षणिकमेवास्ति। इत्थं मनुष्यस्य सर्वदुःखानां मूलकारणम् अनुशासनहीनतैव प्रतिभाति।

निष्कर्षरूपेण वक्तुं शक्यते यदनुशासनं विना कस्यापि राष्ट्रस्योन्नतिरसम्भवेति मत्वा पुराकाले राजानः सेवकाः, गुरवः, शिष्याः, प्रजाः, न्यायिकाः कर्मकराश्च सर्वेऽनुशासनप्रिया आसन्। तदा भारतस्य चतुर्मुखोन्न-तिरासीत्। विक्रमादित्यस्यानुशासनप्रियतां को न जानाति? मानवतायां पशुतायां चानुशासनस्यैव भेदः। परमद्य मानवेभ्यः पशवोऽधिकमनुशासिताः। अत एव सभ्यतारक्षार्थं संस्कृतिरक्षार्थं चानुशासनमहत्त्वं सर्वैः कदापि न विस्मरणीयम्। यद्यपि अस्य सेवनं प्रारम्भे विषवत् कष्टकरं प्रतिभाति, तथापि परिणामे अमृतमिव सर्वथा शिवङ्करं वर्तते। अत एव अवश्यमेव सुखशान्त्यर्थमस्य पालनं विधेयं, येन भारतं पुनः स्वकीयं पूर्वगौरवमधिगच्छेत्।

**शोधार्थिनी**

संस्कृतविभागः

डॉ. भीमराव अम्बेडकर-राजकीय-स्नातकोत्तर-महाविद्यालयः, श्रीगंगानगरम् (राजस्थानम्)

पुस्तकसमीक्षा

❑ म.म. देवर्षिकलानाथशास्त्री

# वेदसूक्तभाष्यसंग्रहः

विश्वेऽस्मिन् प्राचीनतमोऽनादिनिधनज्ञानराशि-संग्रहोऽस्ति वेद एवेति विश्वविदिता घोषणा। चतुर्धा विभक्तस्यास्य वेदज्ञानराशेरनुशीलनं सहस्राब्दीभ्यः क्रियमाणमस्ति। शतशो विद्वांसो वेदानां भाष्याणि प्राणयन्त, शतशोऽनुवादास्तेषां सूक्तानां प्राणीयन्त। वेदेषु सर्वविधो ज्ञानराशिरस्तीति दृष्ट्या उव्वट-महीधरादिभिः कर्मकाण्डप्रेरितानि भाष्याणि प्राणीयन्त, सायण-सातवलेकरादिभिरभिधेयार्थप्रधानानि, अरविन्दमहर्षिणा चाध्यात्मिक प्रवृत्तिपराणि। जयपुरीयेण समीक्षाचक्रवर्ति मधुसूदनझामहाभागेन विज्ञानपरां दृष्टिमालम्ब्य वेदज्ञानराशेर्विज्ञानानुवर्तिनी व्याख्या विविधेषु ग्रन्थेषु प्रस्तुता यया नूतनाः पन्थानः प्रादर्शिषत। तेन हि "भाष्य" रूपेण सूक्तविशेषाणां भाष्यलेखनं नाऽक्रियत, विज्ञानगर्भाणां सर्वेषां सूक्तानां मन्त्रानुद्धृत्य व्याख्याय च विज्ञानरहस्यानि प्रकटितानि। तान्यादाय म.म.पं. गिरिधर शमचतुर्वेद-मोतीलाल-शास्त्रि-देवीदत्तचतुर्वेद-वासुदेवशरण अग्रवाल-कर्पूर-चन्द्रकुलिश-सुरजनदासस्वामि-अनन्तशर्मा-दयानन्दभार्गव-गणेशीलालसुथार-गुलाबकोठारीप्रभृतिभि-र्वेदरहस्यानि प्रकटितानीति विदन्त्येव सुधियः।

एवंविधानां सूक्तानां विज्ञानानुसारि भाष्यं सूक्तपदोद्धरणपूर्वकं प्रकाश्येतेति स्वकीयाभिलाषस्य पूर्त्यर्थं प्रो. दयानन्द भार्गवेण यः सङ्कल्पः कृतोऽभूत्तस्य सम्पूर्तिः सप्तानां वैदिकसूक्तानां त्रैभाषिकभाष्यप्रकाशनेन सञ्जातेति ज्ञात्वा प्रसीदेयुर्वेदश्रद्धालवः। अभिनववेद-पाठमालेति शीर्षकेण प्रकाशिते ग्रन्थे ऋग्वेदीय-मस्यवामीयसूक्तं, पुरुषसूक्तं वाक्सूक्तं नासदीयसूक्तं च, यजुर्वेदीया ईशोपनिषद्, अथर्ववेदीयं कालसूक्तद्वयं च संस्कृते, हिन्दी-भाषायामाङ्गलभाषायां च व्याख्यातम्। व्याख्याने प्रमुखतया पं. मधुसूदन ओझावर्याणां वैज्ञानिकी दृष्टिरनुसृता किन्तु बहुत्र सायणभाष्यं यथावदुद्धृतं (तस्य यथार्थपरत्वात्), बहुत्र च महर्षेर्दयानन्दस्य पन्था अनुसृतः, अन्यत्र महर्षेररविन्दस्य।

सूक्तभाष्यमुद्रणे सेयं दृष्टिरनुसृता यत्सूक्तविशेषस्य मूलमन्त्रसहितं सायणभाष्यं यत्र प्रथममुद्धृतं तत्र तदनन्तरं पुनर्मूलमन्त्रसहितं भार्गवीयं सच्चिदानन्दभाष्यं, तदनु पुनर्मूलमन्त्रसहितो हिन्द्यनुवादः, तदनु पुनर्मूलमन्त्रसहित आंगलभाषानुवादः। अनेन ग्रन्थस्य पृष्ठराशिस्तु समैधत किन्तु तत्तत्पाठकानां सौविध्यं स्यादिति दृष्टिरादृता।

प्रारम्भे वेदानां जीवनदृष्टेः, विज्ञानगर्भरहस्याना-मन्येषां तत्त्वानां च परिचयाय विस्तृतभूमिकाऽस्ति, तदनु तस्या हिन्द्यनुवादः, तदनु आंगलभाषानुवादः। सहैव सायणाचार्यस्य, महर्षेर्दयानन्दस्य, महर्षेररविन्दस्य, मधुसूदनओझावर्यस्य च संक्षिप्तः परिचयोऽपि संस्कृते, हिन्द्यामाङ्गलभाषायां च मुद्रितः। इत्थं भाषात्रये भाष्यप्रस्तुतिः अभिनवः कश्चन प्रयोगः सिध्येत्, कालान्तरे च पाठ्यरूपेण यदि सूक्तसप्तकमिदं कुत्रचन पाठ्येत तर्हि दृष्टिवैशद्यमध्येतृणामध्यापकानां च स्यादित्याशयः प्रणेतृणां प्रतिभाति।

ग्रन्थेऽस्मिन् संस्कृतनिबद्धभागस्य सम्पादनं म.म. देवर्षिकलानाथशास्त्रिणा कृतम् आंग्लभाषानिबद्धस्य च सम्पादनं राजगुरुकथाभट्ट डॉ. सुबोधचन्द्रशर्मणा, हिन्दीभागस्य च स्वयं लेखकेन डॉ. दयानन्दभार्गवेण।

नूतनोऽयं प्रयोगः सर्वविधानां पाठकानां कृते चिरायोपयोगी सिध्येत्, जिज्ञासूनां, छात्राणामनुसन्धातॄणां चोपकारी स्यादिति निश्चितमेव वेदश्रद्धालवः प्रसीदेयुः सर्वमिदं विवरणमवलोक्य। सर्वस्यास्य प्रक्रमस्य कृते म.म. डॉ. दयानन्दभार्गवः, प्रकाशिका राजस्थानसंस्कृत अकादमी च वर्धापनमर्हतः।

**अभिनववेदपाठमालाः** प्रणेता आ. दयानन्द-भार्गवः, सम्पादकौ-म.म. देवर्षिकलानाथशास्त्री, डॉ. सुबोधचन्द्रशर्मा च, प्रका. राजस्थान संस्कृत अकादमी जे-15, अकादमी संकुल, झालाना सांस्थानिकक्षेत्र, जयपुरम् पृ.सं. 700 मू. 280/-.

## हस्तरेखाविमर्शः

हस्तेरखाविमर्शविज्ञानमद्य सुतरां लोकप्रियम्। शार्मण्यदेशादिदमागतमित्येके ब्रुवन्ति, यवनानामिदं विज्ञानं वराहमिहिरेणानीतमित्यन्ये। अस्माकं ज्योतिष-शास्त्रे सिद्धान्त-होरा-संहितेति स्कन्धत्रये विभाजिते संहिता-स्कन्धे प्रमुखमिदं विज्ञानमित्यस्माकं देशे सर्वत्र प्रसिद्धम्। अस्य विज्ञानस्य विवेचका अनेके ग्रन्था व्यलेखिषत गणकैः। ''सामुद्रिकशास्त्र'' नाम्ना प्रसिद्धमिदं शास्त्रं शताब्दीभ्यो भारतेऽधीयते। मुनिमेघगणिनाऽपि हस्तसंजीवननाम्ना शास्त्रस्यास्य ग्रन्थो व्यलेखि। तादृशान् ग्रन्थानधीत्य ज्योतिर्विज्ञान-स्याधेत्र्या डॉ. सीमाशर्मवर्यया ''अधिकार'' नाम्ना विभाजितेषु चतुर्षु खण्डेषु हस्तरेखाध्ययनेन फलादेश-विधिः, हस्तस्पर्शनेन फलादेशः, रेखाभ्यो बान्धवाना-मध्ययनम्, विशिष्टफलाध्ययनमिति विषयाणां विवेचनं फलादेशविधिश्च वर्णितः। (विधिशब्दो ग्रन्थेऽस्मिन् स्त्रीलिङ्गधरः प्रयुक्त इति कथान्तरम्।)

विभिन्नैः प्रमाणैः जन्मपत्रशैलीविधिमवलम्ब्यापि प्रस्तुतैः प्रकारैर्ग्रन्थेऽस्मिन् फलादेशविधयः साधु वर्णिताः। रोगनिर्णयः कथं हस्तमवलम्ब्य क्रियेत, कथं मेलापकादयः क्रियेरन् इत्यादयो विषया अप्यत्र समावेशिताः। इत्थं हस्तरेखाविज्ञानस्य विस्तृतं विवेचनं कुर्वाणोऽयं ग्रन्थः सर्वेषामुपकारको भवेदित्यस्य प्रकाशनोपलक्ष्ये लेखिका सम्पादिका प्रकाशको महाविद्यालयः, प्रेरको महाविद्यालयप्राचार्यः डॉ. सुरेन्द्रकुमारशर्मा च वर्धाप्यन्ते।

**हस्तसंजीवनप्रदीपः** लेखिका डॉ. सीमा शर्मा सम्पादिका-श्रीमती अंजना शर्मा प्रकाशकः शोध एवं प्रकाशन-विभागः श्रीदादूआचार्यसंस्कृतमहाविद्यालय मोती डूंगरी, जयपुर पृ.सं. 120 मू. 150/-.

## कवितासंग्रहः

वरिष्ठसंस्कृतकवेः डॉ. रामकिशोरमिश्रस्य नूतनः कवितासंग्रहः ''संस्कृतकवितासाधना'' शीर्षकवहः सपद्येव प्रकाशितोऽस्ति यत्र समये समये विविधविष-यानवलम्ब्य लिखिताः 103 काव्यरचनाः संकलिताः। कतिपयाः स्तुतयो वसन्ततिलकानिबद्धाः, कतिपयाः समस्यापूर्तयोऽपि छन्दोबद्धाः। कतिपया रचना अनुष्टुभमनुकुर्वत्सुच्छन्दःसु कतिपयाश्च मुक्तच्छन्दःसु निबद्धाः प्रतीयन्ते। योगशास्त्रस्य महत्त्वम्, कावरयात्री, लक्ष्मीबाई, ''स्वार्थः पतनकारणम्'' इत्यादिविषयान् विलोक्य रचनानां विषयवैविध्यमनुमातुं शक्यते।

**संस्कृतकवितासाधनाः** कविः डॉ. रामकिशोर-मिश्रः प्रका. स्वयम् 295/14 पट्टीरामपुरम् खेकड़ा, बागपत, उ.प्र., पृ.सं. 112, मू. 100/-.

# ऋणानुबन्धः ( स्मृतिकथा )

❑ डॉ. हर्षदेवमाधवः

पुरतो या चिता प्रज्वलति सा मम अग्रजभ्रातुः। स एव मम पितृसदृशः, मार्गदर्शकसदृशः, मित्रसदृशः, शत्रुसदृशः। स एव मम समीपे तथापि मम जीवन-सङ्कल्पेभ्यो दूरे वर्तते स्म। अथ किम्! ऋणानुबन्धः समाप्तः। तथापि प्रार्थये यद् पुनर्जन्मनि तस्य मेलापो न भवेदिति। यदि मम वा तस्य वा पुनर्जन्म भवेत्...।

मम आयुषश्चतुर्थे वर्षे पिता स्वर्लोकं गतः। तदा अग्रजो मे ''मेट्रिक'' कक्षायामासीत्। तस्मिन् काले 'पूना' नगरतः प्रवर्तिता एषा परीक्षा दुर्लङ्घ्या आसीत्। स उत्तीर्णो जातः। किन्तु आर्थिकपरिस्थितिवशात् तेन बाह्यछात्ररूपेण अध्ययनमारब्धम्। तस्मिन् काले आङ्गलभाषामाध्यमेन परीक्षा दातव्या इति नियमः। स कदाचिद् उत्तीर्णो भूत्वापि एकस्मिन् विषये अनुत्तीर्णोऽभवत्। तथैव शनैश्शनैः स्नातको जातः। पितुरनुपस्थितिवशात् गृहभारो मातृस्कन्धे आसीत्। माता प्राथमिकशिक्षिका आसीत्। सार्धशतरूप्यकाणि तस्या वेतनमासीत्। वयं त्रयो भ्रातरः एका भगिनी च इत्थं पञ्चजनानामस्माकं कुटुम्बम्। अग्रजो मे दुर्ललितः स्वतन्त्रो, निरङ्कुशः स्वच्छन्दाचारोऽपि। स्थैर्यं तस्य भाग्ये न लिखितमासीत्। अतः तेन विविधव्यवसायाः कृताः। क्रीडनकविक्रेता, ताम्बूलविक्रेता, पेट्रोलपम्पसेवकः, यन्त्रागारे कर्मकरः, सर्वकारतन्त्रे अधिकारी, गृहाद् गृहं गत्वा वस्तुजातस्य विक्रेता, ज्योतिर्विद्, कर्मकाण्डी, भागवतकथाकारः इत्थं नाना कार्याणि अकरोत्। कदाचित् स लक्ष्मीमन्वधावत्, कदाचित् सम्पत्तिस्तं प्रत्यागच्छत्। स येन केन प्रकारेण द्रव्यप्राप्तिं कर्तुमयतत। 'द्रवति हस्तादिति द्रव्यम्' तद्व्युत्पत्तिः तस्य जीवने प्रमाणमासीत्। तस्य अपकृत्यैर्दूषितं मे शैशवं दुःखदमासीत्, कुलञ्च अपयशोलाञ्छनमयम्। तथापि कर्मयोगिवत् सोऽवदत्; अहं मम स्वार्थाय न किञ्चित् करोमीति। किन्तु तस्य निस्स्वार्थिकृत्यैरस्माकं तु अहितमेवाभवत्।

मध्यमभ्रात्रा सह मयापि काव्यलेखनं तारुण्ये आरब्धम्। अग्रजस्य मनसि द्रढिष्ठा मान्यताऽऽसीद् यत् कवयो ह्यलसाः कर्मचौराः कल्पनाशीला भवन्ति। तेषामुपरि लक्ष्म्याः कृपा नैव भवति यतो हि सरस्वती लक्ष्म्याः प्रतिपक्षे वर्तते। इति। अतो हि स मां लिखन्तं दृष्ट्वा अक्रुध्यत्। मम पत्राणि छित्वा अक्षिपत् अथवा निन्दावचनानि अवदत्। शिक्षकान् प्रति तस्य मनसि धिक्कारभावना आसीत् यो व्यवसाय आवाभ्यां स्वीकृत आसीत्।

तस्य वैवाहिकजीवनमतृप्तेः पर्याय आसीत्। कटुभाषिण्या भ्रातृजायया अस्माकं सम्बन्धो नासीत्। तथापि भूकम्पकाले तेन आश्रयो दत्तः एकमासं यावत्।

यदा तस्य समीपे धनं वर्तते स्म, तदा स अस्माकं कृते वस्तुजातं क्रीत्वा प्रायच्छत्, यदा धनाभावस्तमपीडयत् तदा मम नाम दत्त्वा स आपणेभ्यः ऋणं कृत्वा वस्तुजातमनयत्। वणिजस्तद् धनं मत्तः हस्तगतमकुर्वन्। दुर्गासप्तशत्यां तस्य अपूर्वा श्रद्धा, किन्तु व्यवहारे स्थैर्याभावः तस्य प्रकृतिरासीत्।

शववाहका भ्रातुः शवमग्निसात् कृत्वा कलशे भस्म निक्षिपन्ति। अहमपि अग्रजस्य स्मृतीर्मे हृत्कलशे संस्थाप्य प्रतिनिवर्ते। अधुना न सन्ति प्रणयवचनानि, न सान्त्वनावचनानि, न सन्ति अधिक्षेपनिन्दा-वचनानि, नास्ति वृक्षच्छाया, नास्ति स्नेहपरिचयः, नास्ति काव्यशत्रुता, अतीतनीहारच्छन्नाऽस्ति प्रियाप्रियस्मृति-संहतिः शिष्टा।

8, राजतिलक बंगलोज,
बोपाल, अहमाबाद

श्रीमतां बाबासाहेबआप्टे महोदयानां व्यक्तित्ववर्णने-

एकविंशः प्रसङ्गः

# उपालम्भा अपि सोढव्याः

❑ वेणीमाधव गो. धर्माधिकारी

मध्यप्रदेशात्सागरनगराल्लक्ष्मणगंगाधरखेर-महोदयाः वर्णयन्ति-वार्तेयं 1938 वर्षस्य वर्त्तते। मध्यप्रदेशे सागर नगरे प. पू. द्राक्तरमहोदयाः संघशाखायाः बीजारोपणं विधायागता एवासन् मासद्वयानन्तरमेव पुनः बाबामहोदयाः समागताः। ते मम गृहे एव स्थिताः। अहं तदा बाल एवासम्, संघकार्येणापरिचितोऽपि चासम्। मम पू. पितृचरणैः तेभ्य एव नगरस्य प्रमुखस्वयंसेवकेभ्य आमन्त्रणं जलपानार्थं प्रदत्तं ये द्राक्तरमहोदयानामुपनिषदि समागता आसन्। आप्टेमहोदयैश्च तेषां सम्मुखे संघसम्बन्धिनो विचाराः प्रस्तुताः। उपनिवेशनानन्तरं ते मामवदन्-अधुना मया सागरनगराद् झांसीनगरे गन्तव्यमस्ति। पुनश्च तैः कथितं तत्र कस्यापि गृहे स्थातुं काचिद् व्यवस्था भवितुं शक्नोति किम् ? यदि व्यवस्था स्यात्तदा तु शोभनं स्यात्। मया कथितं तत्र तु अस्माकं सम्बन्धिनो निवसन्ति तैश्च प्रसन्नता अभिव्यक्ता। मम पृष्ठं परिमृशता च कथितं तदा तु शोभनमेव, सहवासस्यानन्दोऽपि मिलिष्यति। सहवासस्येति तेषां कथनतात्पर्यं बालकस्य मे विचारे कथमागच्छेत्। मया पत्रं गृहीत्वा तस्मिन् सम्बन्धिनो निवाससङ्केतं विलिखितुमभिलषितम्। तदा ते अवदन्-वाह! इदं कथं भविष्यति-किं त्वं नैव चलिष्यसि। क्षणद्वयं यावदहं सन्देहमग्न एवासम्। पितुराज्ञां विना कथयितुं कथं शक्यते। परमिदं सत्यं तैः सह मिलनेन वार्त्तायां च मह्यमात्मीयता संप्राप्तासीत्। अहं निषेधमपि कर्त्तुं समर्थो नासम्।

अन्ते तेषां विशेषाग्रहेण मया पितुराज्ञा सम्प्राप्ता। तैः सह च प्राचलम्। झांसी नगरे तैः सह दिनद्वयं न्यवसम्। ते बहुभिर्जनैर्मिलिताः। मया स्मर्यते तत्रैकेनार्यसमाजिना तेषां दीर्घा चर्चा संजाता। चर्चा कस्मिन् विषये आसीदिति न मया तदावबुद्धम्। मम कृतेऽपि संघस्तस्मिन् समये नवनवीन एवासीत्।

परावर्तनस्य वार्ता प्रारब्धा। निर्णीते दिवसे एव बाष्पयानेन चलिष्यावः। परं यानसमयाद् होराद्वयपूर्वमेव तैः कथितम् चल बाष्पयानविश्रामस्थलं प्रति गमिष्यावः। मार्गे किञ्चित्कार्यमस्ति तदपि निवृत्य चलिष्यावः। अहं कौतूहलेनाचिन्तयम्, मया पृष्टं किं भवता परिचितः कोऽप्यत्रास्ति। तेऽवदन् अस्ति तु परं तत्र गत्वा मह्यमपशब्दा एव मिलिष्यन्ति। श्रुत्वैव गन्तव्यम्, आवां प्रस्थितौ। मार्गे तैः कथितम् बाष्पयान-वसतौ तेषां भगिनी निवसतीति। मया पृष्टं भवता भगिन्यत्र वसत्यथापि अत्र स्थातुं व्यवस्थार्थं मां किं कथितम्? तेऽवदन् यदि भगिनी गृहे निवासः कृतः स्यात्तदा संघकार्यार्थमुचितः समयो नैव मिलितः स्यात्। अधिकः समयश्च तस्यै एव दातव्यः स्यात्। तदा निश्चितरूपेण कार्यं नैव स्यात्।

संघकार्यार्थं तेषामियं दृष्टिः तस्मिन् समये तु मह्यं विचित्रैव भासतेस्म। परमद्य चिन्तयामि सत्यसंघकार्यं कुर्वता स्वव्यक्तिगतसम्बन्धान् पारिवारिकभावनां च कार्ये बाधिकां न विधातुं कियती-कुशलता, सतर्कता, कठोरता च व्यवहरणीया भवति। तदैव संघकार्यं वृद्धिं प्राप्नोति।

एवमावां तेषां भगिनीगृहे सम्प्राप्ताः। भगिन्या च मिलनसमयत एवोपालम्भपूरितवाक्यानां प्रयोगः प्रारब्धः। क्रोधस्यात्मीयतायाश्च घोरा वृष्टिः समजायत। बाबामहोदयाश्च शान्तभावेन शृण्वन्त आसन्। मध्ये मध्ये स्मितपर्वूकं किंचित् वदन्तिस्म परं भगिनी शान्तैव नासीत्। अन्ते तेऽवदन्-अहं केवलं मिलितुमेवागतः। अधुना त्वं किमपशब्दप्रदानमेव करिष्यस्यथवा भ्रात्रे भक्ष्यपानमपि किमपि कारयिष्यसि। भक्ष्यपानस्य नाम श्रुत्वैव भगिनी शान्ता। तया शीघ्रमेव किञ्चिन्निर्मितम्। हसन् वदन् भक्षयित्वा आवामग्रे प्रस्थितौ।

सहजमेवाहं बहु विचारमग्न एवासम्। मम चिन्तने साहाय्यं विदधता तैरवबोधितं राष्ट्रकायार्थं सर्वमिदं सह्यं भवति।

**धर्माधिकारी भवन, ब्रह्मपुरी, जयपुरम्**

---

**प्रेरकप्रसङ्गशतकम्** **त्रिचत्वारिंशः प्रसङ्गः**

# ज्ञानं भारः क्रियां विना

**❑ मा. श्रीमती आराधना धर्माधिकारी**

प्रश्नोऽयं समुदेति-अद्यत्वे धर्मस्य प्रभावः किं न दृश्यते। अयमेव प्रश्नः केनाप्येकं महात्मानं पृष्टः। अद्यत्वे धर्मस्य प्रभावः किं न दृश्यते? महात्मा अवदत्-यूयं कथयत राजभवनमितः कियद्दूरम्? द्विशतमाइल-मात्रम्। किं यूयं जानीथ। आम् जानीमः। किं यूयं राजभवनस्य नामग्रहणेनैव राजभवने सम्प्राप्ताः वा संप्राप्ता भवथ-महात्मना पृष्टम्।

कथं प्राप्स्यावः, साम्प्रतं वयं भवतां संमुखे स्मः। राजभवनस्य कृते यदा प्रस्थानं करिष्यामः कतिपय-दिनैश्चलित्वा पश्चादेव तत्र प्राप्स्यामः। महात्मा-अवदत् युष्माकमस्मिन्नुत्तरे एव युष्माकं पूर्वप्रश्नस्योत्तरं गुप्तमस्ति। यूयं राजभवनं जानीथ परं यावत्तदर्थं प्रस्थानं न करिष्यथ तावत् तत्र प्राप्तुमपि न शक्नुथ। इदमेव धर्ममार्गेऽप्यस्ति। धर्मं जानीथ परं यावत्तन्नियमानुसार-माचरणं नैव करिष्यथ तावद् धर्मप्रभावः कथं परिलक्षितः स्यात्। धर्मस्योपादानानां यद्युपेक्षा भवेद् धर्म आचरणे नागमिष्यति। धर्मस्य मूलेषु क्षमा सहनशीलता च वर्त्तेते। इमे महत्यौ शक्ती स्तः। अपेक्षा त्वियमेव यत् जीवने प्रारम्भत एव परिवर्त्तनं भवेत्। यद्येवं न स्यात्तदाप्यवस्थया सह स्वस्वभावे प्रवृत्तिषु च परिवर्त्तनं प्रारब्धव्यम्।

क्रमशः

# रामकुमारशर्मप्रणीतवृक्कयौतुकस्य समीक्षणम्

❑ डॉ. कमलकान्तबालाणः

साम्प्रतिके युगेऽस्मिन् नैके कवयः काव्यसाधना-संलग्नाः, संस्कृतवाग्देवीसमुपासनासंलग्नाः सन्ति। ते कवयः संस्कृतभाषायां नवनवाभिर्दृष्टिभिः चिरं काव्यं रचयन्तः सन्ति। युगेऽस्मिन् प्रो. राधावल्लभ-त्रिपाठिनः अभिराजराजेन्द्रमिश्राः, रेवाप्रसादद्विवेदिनः, रमाकान्तशुक्लाः, हर्षदेवमाधवाः, नारायणदाशाः, कपिलदेवद्विवेदिनः, रामकुमारशर्माणः, कलानाथ-शास्त्रिप्रभृतयः कवयः स्वकीयैः काव्यैः संस्कृत-वाग्देवीं प्रतिष्ठापयन्ति, प्रसारयन्ति, विस्तारयन्ति च।

एतेषु महाकविषु डॉ. रामकुमारशर्माणः कवित्वेन नितान्तप्रसिद्धाः सन्ति। एतेषां महोदयानां हस्तकमलैः नैकानि काव्यानि विगत-दशकद्वये प्रकाशितानि।

## डॉ. रामकुमारशर्मा

महाकवि-शास्त्रपारङ्गत-रसगङ्गाधरपारावारीण-नाट्यनिर्देशकरामकुमारशर्मा प्राचीनबिहारप्रदेशस्य वर्तमानझारखण्डप्रदेशस्य हजारीबागजनपदान्तर्गते चपरख इति ग्रामे जन्म लब्धवान्। प्रारम्भिकी शिक्षा तत्रैव उच्चशिक्षा च दरभङ्गानगर्यामर्जिता। राजकीयसेवायां राष्ट्रियसंस्कृतसंस्थानस्यादर्शमहाविद्यालये कार्यकरणा-नन्तरं संस्थानस्य गरलीपरिसरे सेवां दत्तवान्। सम्प्रति जयपुरपरिसरे साहित्यविभागे विभागाध्यक्षत्वेन विराजते। महाकविनाऽनेन नैकानि काव्यानि रचितानि। तेषु प्रमुखानि काव्यानि, ग्रन्थाश्च यथा-

1) भरतचरितमहाकाव्यम्, 2) सीतास्तुतिः, 3) लक्ष्मीस्तुतिः, 4) काव्यप्रकाशरसगङ्गाधरयोस्तुलना, 5) प्रत्यभिज्ञाप्रदीपः, 6) व्यक्तिविवेकविमर्शः, 7) कोविदानन्दविमर्शिनी, 8) राधास्तुतिः, 9) प्रभातवर्णनम्, 10) सन्ध्यावर्णनम्, 11) वर्षावर्णनम्, 12) सूचीकर्तरीसंवादः, 13) वृक्कयौतुकञ्चेति।

## वृक्कयौतुकम्

वृक्कयौतुकं महाकवेः रामकुमारशर्मणोऽभिनव-काव्यम्। स्वयं महाकविः भूमिकायां कथयति- **''इह उपमानोपमेयानां युगानुसारिणी योजना कृतास्तीति न केवलं विषयदृष्ट्या, काव्यतत्त्वप्रयोगदृष्ट्या-पीदमभिनवं काव्यम्''** (1)[1]

वृक्कयौतुककाव्यं काव्यशास्त्रीयभेदानुसारेण खण्डकाव्यम्। खण्डकाव्यमिदम् एकषष्ट्युत्तरशत-संख्याकैर्मन्दाक्रान्तावृत्तनिबद्धैः, श्लोकैः रचितम्। सर्वत्रालङ्काराणां सौन्दर्यं दरीदृश्यते नरीनृत्यते च।

## वृक्कयौतुककाव्यबीजम्

इह राधाभिधाना काचन कन्या स्वविवाहार्थमपेक्षितं रूप्यकाणां लक्षं लब्धुं स्वकीयं वृक्कमेकं विक्रेतुमानन्दाभिधानस्य चिकित्सकस्य चिकित्सालये प्रयतते। साऽऽन्ते आनन्देनैव परिणीयते। इदमस्य कथाबीजं खण्डकाव्यस्य।

इह काव्ये नायक आनन्दो नायिका च कस्यचिद् दरिद्रस्य पञ्चकन्यापत्यस्य कृषकस्य ज्येष्ठा पुत्री राधा। नायक आनन्दः सफलः चिकित्सकः शुल्कं विनैव सेवाभावनया चिकित्सां करोतीति तस्य चारित्रिक-वैशिष्ट्यमत्र अनुकरणीयतया प्रस्तुतम्। राधा च मातुरुपदेशेन स्वचारित्र्यं रक्षन्ती दरिद्रकृषकपुत्र्याः स्वाभिमानं प्रकटयन्ती स्त्रीणां कृते अनुकरणीयत्वेन वर्णिता।

## खण्डकाव्यस्य कथा

काव्यस्याऽस्य कथा कानने वीतरागिदर्शनेन प्रारभ्यते

कविना। अनन्तरं नायिकया राधया सह वीतरागिणः संवाद आरभ्य कथा स्वकीयां गतिं प्राप्नोति। राधा स्वकीयपरिणयवृत्तान्तैः स्वकीयां कथां श्रावयति। कथं विवाहोत्सवः प्रारभते, कथं च मध्ये एव विवाहे विघ्नायते। किमर्थं सर्वं त्यक्त्वा वनमागतवतीति कथयति। एकस्य दरिद्रस्य पञ्च कन्या जाताः। विगतकाले ज्येष्ठा कन्या विवाहयोग्या इति चिन्ताकुलो पिता स्वकीयान् प्राणान् अत्यज्यत्। माता विवाहाय स्वकीयं सर्वं दत्वा लक्षरूप्यकाणि तु प्राप्नोति किन्तु इदानीमपि लक्षस्यैकस्य व्यवस्थावशिष्टा। राधया अज्ञायत यत् वृक्कदानद्वारा रूप्यकाणां व्यवस्था भवितुमर्हति अत वृक्कदानाय नृपतिनगरं गम्यते दानञ्च क्रियते किन्तु गोपनीया एषा कथा अगोपनीया जाता। नायिका राधा स्वकीयजीवनं समाप्य मरणस्वीकाराय वनं गच्छति। तत्र वीतरागिणः शरणं गच्छति। स एव वीतरागी आनन्द आसादिति कथाया अवसाने राधा जानाति। अन्ते उभयोर्मेलनं संजायते। कथादर्पणे सामाजिक्यः समस्याः कन्याभ्रूणहत्या, यौतुकातङ्कः, व्यभिचारः, वैज्ञानिका-विष्काराणां दुष्प्रयोगाः, दम्भश्चेत्यादयः प्रतिबिम्बिताः।

**वृक्कयौतुकस्य समीक्षणम्**

काव्येऽस्मिन् रामकुमारशर्मणोऽभिनवदृष्टिः सर्वत्र दृश्यते। काव्यमिदं काव्यात्मदृष्ट्या अतीव श्लाघनीयम्। काव्येऽस्मिन् प्राकृतिकवर्णनम्, नखशिखवर्णनम्, सामाजिकी रीतिः, सामाजिक्यः समस्या अत्यन्त-भावपूर्णदृष्ट्या, औचित्यदृष्ट्या च प्रकटिताः कविना। खण्डकाव्यस्यास्याद्यः श्लोक एव कवेः काव्यत्वशक्तिः प्रकाशते –

**काञ्चित् कन्यां तरुवरपृथुस्कन्धविन्यस्तपाशां,**
**प्राणत्यागव्यवसितमतिं शातकुम्भद्रवाभाम्।**
**देशादस्माज्जिगमिषुमिव स्वच्छनिःस्वार्थनीतिं,**
**कश्चित् कस्मिंश्चन घनवने वीतरागो ददर्श।। (2)**

काव्येऽस्मिन् कविहस्तकमलेन पाठकैः ज्ञायते युगेऽस्मिन् कस्य कीदृशी स्थितिः जाता। वीतरागिणा यदा नायिकया राधया सह कथायाः प्रारम्भे संवादः क्रियते –

**किं त्वं त्यक्ता मनुजपशुभिः संस्कृतिर्भारतीया**
**दैवी वाणी किमसि वद वा शासकैः पीड्यमाना।**
**शिक्षाऽऽहोस्वित् कमलनयने शिक्षकैस्त्यज्यमाना,**
**विद्यां किं वा युवभिरधुना नूतनैरस्यमाना।। (3)**

कविभिः रामकुमारशर्मभिः दरिद्रतायाः वर्णनं स्वकीयकाव्यत्वशक्तिभिरभिनवदृष्टिं स्वीकृत्य क्रियते। राधागृहवर्णनं यथा–

**मध्ये-सौधावलि मम गृहं गोमयालिप्ततिर्य-**
**क्कुड्यं जीर्णच्छदि कलयते चन्द्रगाङ्कस्य लक्ष्मीम्।**
**तस्मिन् प्राच्यां पशुकवसतिः प्राङ्गणस्यैककोणे,**
**यस्या नासां तुदति सततं गोपुरीषोग्रगन्धः।।**
**उड्डीनाभिर्भिनभिनभिनध्वानयुग्भिर्दिवा नो,**
**निद्रा कामं भवति सुलभा मक्षिकाभिः कदापि।**
**रात्रिर्जीर्णच्छदिनिपतदब्बिन्दुभिः क्लिश्यमानैः,**
**खट्वाकोणाऽऽकुचितवसनैर्नीयते मेघकाले।।(4)**

युगेऽस्मिन् धनिकजनानां चारित्र्यं स्पष्टीक्रियते कविना रामकुमारेण–

**तत्पुत्रोऽसौ पतितचरितो याच्यमानो जनन्या,**
**सभ्रूभङ्गस्मितयुतमुखो दुर्मुखस्तां बभाषे।**
**चेज्ज्येष्ठा ते भवति तनया राधिका रात्रिमेकां,**
**शय्यायां मे शशधरमुखी लक्षमेकं ददामि।। (5)**

दरिद्रजनानां क्रोधः कथं निःसरतीति उच्यते रामकुमारशर्मणा –

**क्रोधस्तस्या नहि स दहनः स्थातुमासीच्चिराय,**
**शक्तः शीघ्रं पिहितहृदयः शोकमेघो ववर्ष।**
**नेत्राण्यासन् घनजलनदीप्लाव्यमानानि तूर्णं,**
**मन्ये प्रावृण्मम कुवसतो ग्रीष्मभीताऽभयाऽभूत्।।(6)**

[1] वृक्कयौतुकम्-भूमिकायाम्

कविः काव्यस्याऽस्य माध्यमेन स्वकीयान् विचारान् प्रस्तौति कथयति च यदि सर्वैः, जनैः सुचरिता वधूरिष्यते तर्हि यौतुकप्रापणस्याधिकारो न स्यात्। यदि यौतुकमिष्यते तर्हि सुचरितावधूप्रापणस्याधिकारी न स्यात्-

**दोषं चेन्नो नृपशुसमजो मन्यते यौतुकं तत्,**
**कस्माल्लभ्यः, सुचरितवधूप्रापणेऽस्याधिकारः।।(7)**

कविः काव्यस्यास्य माध्यमेन मुख्यरूपेण स्वकीयान् विचारान् समाजेऽस्मिन् प्रसारयति इति सर्वत्र काव्येऽस्मिन् दृश्यते। तथापि कविना खण्डकाव्यस्य लक्षणं न त्यज्यते। नायकानन्दस्य वर्णनं यथा -

**आनन्दोऽयं सदयहृदयो रोगिरोगार्तिनाशे,**
**लग्नो नाद्यावधि परिणये दत्तचित्तो बभूव।**
**अस्य ख्यातिर्दिशि दिशि जनास्तं स्तुवन्ति प्रसन्नाः,**
**वैद्यास्त्वन्ये विदधति बहु द्वेषमस्मात् कुचित्ताः।।(8)**

युगस्याऽस्य विसङ्गतिः राधामुखात् कथ्यते महाकविना रामकुमारशर्मणा सरसरीत्या सुमनोहर-शैल्याभिनवदृष्ट्या -

**त्राणार्थं यं यमियमयते पीड्यमाना पुमांसं,**
**व्याघ्रो भूत्वा स स तु कुरुते भक्षितुं तां प्रयत्नम्।**
**सद्वृत्ताऽपि प्रभवति शिरो नोन्नतं स्वं विधातुं,**
**पुंगेहे या विहितवसतिर्जानकी किं न मानम् (9)**

सर्वत्र कवेरभिनवदृष्टिः दृश्यते। सर्वत्र सामाजिकी समस्या उत्थाप्यते तथापि प्राकृतिकसौन्दर्यं न विस्मर्यते महाकविना रामकुमारेण। वर्षावर्णनं यथा-

**मुक्तास्थूलैर्विशदविशदैर्बिन्दुभिर्मेघवारां,**
**सल्लोमाञ्चा मृदुनखपदैर्भूरभून्नव्यकन्दा।**
**तापातङ्कप्रभवनृपतेर्ग्रीष्मरूपस्य वर्षा,**
**कालच्छिन्नं भुवि निपतितं छत्रकं छत्रमासीत्।।(10)**

नायिकाया राधाया नखशिखवर्णनं महाकवे राम-कुमारशर्मणो महाकवित्वं प्रतिपादयति -

**राधां क्लिन्नां जवनिपतता पाथसा संविधाय,**
**लुप्ताः सद्यो जवनपवनप्रेरिता वारिवाहाः।**
**दृष्टो भास्वानरुणकिरणं योगिवासो वसान-**
**श्चुम्बन् प्राचीमुखमविरतं मुक्तमेघावरोधम्।।**
**धाराहारावनिनगमहोत्तुङ्गरम्यस्तनाग्रं,**
**स्पर्शं स्पर्शं स्वकरकमलेन प्रसर्पन् स सूर्यः।**
**मां काषायाम्बरधरमयं कामुकत्वं दधानं,**
**लोको वक्ता किमिति गणनां मुक्तलज्जो न चक्रे।।(11)**

महाकविना काव्येऽस्मिन् निर्दिष्टं यत् अद्यतने युगेऽस्मिन् कपटाचारिणः साधुवेशं धारयन्तीति, धनिकजनान् एवं जनाः पूजयन्तीति, अद्यतने युगे ये आविष्काराः ते जनान् लाभस्थाने विसङ्गतिमधिकम् उत्पादयन्तीति। काव्यस्यास्य पूर्णता यौतुकपिशाचस्य समाप्त्या सह कविवरेण रामकुमारशर्मणा क्रियते-

**कन्यारत्नागमनरहितः कोऽपि न स्याद् गृहस्थो,**
**न स्ताद्विद्युत्स्फुरणविकलः कोऽपि मेघः सनीरः।**
**तद् भैषज्यं भवतु भिषजां हस्तगं येन कुष्ठं**
**ध्वंसं यायात् प्रसरदनिशं यौतुकं लोकदेहे।।(12)**

अनेन प्रकारेण काव्यमिदं महाकविभिः रामकुमारशर्मभिः आधुनिकयुगस्य विसंगतिमाश्रित्य प्रणीतम्। महाकविभिः काव्यमाध्यमैन यौतुकपिशाचस्य नाशस्य मार्गः प्रदर्शितः। काव्यमिदं वर्ण्यविषयदृष्ट्या तु अनुपममद्भुतञ्च वर्तते एव शैलीदृष्ट्यापि अद्भुतमिति नात्र संशयः।

**पूर्वव्याख्याता-संस्कृतवाङ्मयस्य,**
**श्री दिगम्बरजैन-आचार्यसंस्कृतमहाविद्यालयः,**
**जयपुरम्**

# कार्यसिद्ध्यर्थं मन्त्राणां प्रयोगः

❑ डॉ. महेन्द्रकुमारमिश्रा

**मननं विश्वविज्ञानं, त्राणं संसारबन्धनात्।**
**यतः करोति संसिद्धिं, मन्त्र इत्युच्यते ततः।।**

-पिंगलामते

अर्थात् मन्त्रे विश्वविज्ञानस्य संसारबन्धनात् त्राणस्य शक्तिः विद्यते। उपर्युक्तयोः द्वयोः कार्ययोः सिद्धिः येन वर्णसमुदायेन भवति स एव मन्त्र इत्युच्यते। अस्मिन् सन्दर्भे महान् मन्त्रशास्त्रिणा श्री भास्कररायमखी महोदयेनोक्तम् यत् -

**पूर्णाहन्तानुसंध्यात्म-स्फूर्जन् मननधर्मतः।**
**संसारक्षयकृत् त्राणधर्मतो मन्त्र उच्यते।।**

-ललितासहस्रनाम

मन्त्राणां प्रभावेण आत्मनः स्फुरणं भवति संसारस्य क्षयः अर्थात् बन्धनानां मुक्तिः एव मन्त्रस्य मूलार्थः अस्ति। निरुक्तकारो यास्कोऽपि कथयति यत् ''मन्त्रो मननात्'' अर्थात् मननकारणेन मन्त्रस्य प्रयोगः भवति।

उपर्युक्तव्याख्यायां तु मन्त्राणाम् आध्यात्मिकी व्याख्या वर्तते। किन्तु वर्तमानसन्दर्भे यत्र मानवाः स्वकार्यसिद्ध्यर्थं मन्त्राणां उपयोगं कुर्वन्ति तत्र आवश्यकता वर्तते यत् ते सर्वप्रथमं एतादृशानां मन्त्राणां विषये जानीयुः येन माध्यमेन तेषां कार्याणि सफलानि भविष्यन्ति। मन्त्रे चमत्कारिणी शक्तिः विराजते। अस्मिन् जगति एतादृशं किमपि कार्यं न अस्ति यन् मन्त्रमाध्यमेन न संभविष्यति। मंत्रमहिमसन्दर्भे महात्मा तुलसीदासः कथयति, यत्-

**मन्त्र परम लघु जासु बस, विधि हरि हर सुर सर्व।**
**महामत्त गजराज कहँ, बस कर अंकुश खर्व।।**

-श्रीरामचरितमानस

अर्थात् लघुमन्त्रेण ब्रह्म-विष्णु-महेशादय सर्वे वशीभूताः भवन्ति। अतः कार्यसिद्ध्यर्थं मन्त्राणां प्रयोगात् पूर्वं केचन सिद्धान्ताः अथवा नियमाः सन्ति येषां पालनेन साधकः फलं प्राप्नोति।

**<u>मंत्रसाधनायां पालनीयाः नियमाः</u>**

• **जपस्थाननिर्णय :-**

**''पुण्यक्षेत्रं नदीतीरं गुहा पर्वतमस्तकम्।**
**तीर्थप्रदेशाः सिन्धूनां सङ्गमः पावनं वनम्।।**
**उद्यानानि विविक्तानि बिल्वमूलं तटं गिरेः।**
**देवतायतनं कूलं समुद्रस्य निजं गृहम्।।**
**साधनेषु प्रशस्यन्ते स्थानान्येतानि मन्त्रिणाम्।।''**

- पुरश्चरण चंद्रिका

अर्थात् मंत्रसाधनायाः कृते नदीतीरं, गुहा, पर्वतशिखरम्, तीर्थस्थलम्, नदीनां संगमस्थलम्, पवित्रवनम्, उद्याने एकान्तस्थानम्, बिल्ववृक्षस्य अधः स्थानम्, गिरेः तटम्, देवालयः, समुद्रतटम्, निजगृहम् च अनेकानि स्थानानि उत्तमानि सन्ति।

**दिशानिर्णयः** - साधकस्य कृते विधानं वर्तते यत् सः साधनायाः सिद्ध्यर्थं पूर्वाभिमुखः अथवा उत्तराभिमुखो भूत्वा सीदेत्। यथोक्तम् -

**उपविश्यासने मंत्री प्राङ्मुखो वा ह्युदङ्मुखः।**
**रात्रावुदङ्मुखैः कार्यं देवकार्यं सदैव हि।।**

- मन्त्रमहार्णव

अस्मिन् सन्दर्भे फेत्कारिणी तंत्रे इतोऽपि उल्लिखितं वर्तते, यत्-

**प्राङ्मुखोदङ्मुखो वापि वक्ष्यमाणक्रमेण तु।**

**श्रीकामः शान्तिकामो वा पश्चिमाभिमुखः स्थितः।।**

–फेत्कारिणी तंत्र

अर्थात् श्रीसंपन्नताशान्त्यर्थं साधकः पूर्व-उत्तर-पश्चिमदिशायां वा मुखं कृत्वा मंत्रं जपेत्।

**आसननिर्णयः –**

**''जपेन्निधाय दर्भांस्त्रीन्कुशचर्म-वरासने।**
**काष्ठपल्लववंशाश्मगोशकृत्तृणमृण्मयम्।**
**विषमं कठिनं मंत्री त्यजेदासनमाधिदम्।।''**

– मंत्रमहोदधि

अर्थात् जपसिद्ध्यर्थं साधकः मुंजनिर्मिते, वस्त्रस्य, कुशस्य तथा चर्मणो वा आसने सीदेत् न तु काष्ठस्य, पत्रस्य वंशस्य, तृणस्य, मृत्तिकायाः।

शारीरिकस्थित्यनुसारेण आसनानां भेदाः – भिन्न-भिन्नमंत्रसिद्ध्यर्थं पृथक्-पृथक् आसनानां निर्देशः यथा- स्वस्तिकासनम्, पद्मासनम्, वीरासनम्, सुखासनम् इत्यादीनि प्रमुखानि।

**1. स्वस्तिकासनम्-जानूर्वोरन्तरे कृत्वा सम्यक्पादतले उभे।**
**ऋजुकायो विशेद्योगी स्वस्तिकं तत्प्रचक्षते।। 1।।**

**2. पद्मासनम् – ऊर्वोरुपरि विन्यस्य सम्यक्पादतले उभे।**
**अंगुष्ठौ च निबध्नीयाद्धस्ताभ्यां व्युत्क्रमात्ततः।। 2।।**

**3. वीरासनम् – एकं पादमधः कृत्वा विन्यस्योरौ तथोत्तरम्।**
**ऋजुकायो विशेद्योगी वीरासनमितीरितम्।। 3।।**

– मन्त्रमहार्णवः (1-3)

• **मालानिर्णयः** – मालासु अरिष्ट-पुत्रजीवा-शंख-पद्मकाष्ठ-मणि-कुशग्रन्थिस्तथा च रुद्राक्षस्य माला उत्तरोत्तरा:उत्तमाः सन्ति। यथोक्तम्-

**अरिष्टपुत्रजीवैश्च शङ्खपद्मैर्मणिस्तथा।**
**कुशग्रन्थिश्च रुद्राक्षा उत्तमं चोत्तरोत्तरम्।।**

– मंत्र-शक्ति

मंत्रखण्डेऽपि उल्लिखितमस्ति यत् साधनायां स्फटिकस्य मौक्तिकास्य च माला शुभकरी अस्ति तथा च साधकः रुद्राक्षमालां धारयित्वा जपं करोति चेत् सिद्धिं निश्चितरूपेण प्राप्नोति।

**स्फाटिकी मौक्तिकी वापि प्रोतव्या सितसूत्रकैः।**
**सर्वकर्मसमृद्ध्यर्थं जपेद् रुद्राक्षमालया।।**–मंत्र खण्ड

• **अंगुलीनिर्णयः** – जपे अंगुलीनामपि महत्त्वं वर्तते। शिवाज्ञा विद्याग्रन्थे अस्मिन् सन्दर्भे वर्णनमस्ति, यत्-

**''अंगुष्ठं मोक्षदं विद्यात्तर्जनी शत्रुनाशिनी।**
**मध्यमा धनदा शान्तिकरत्वे वा ह्यनामिका।।**
**कनिष्ठा कर्षणे शस्ता जपकर्मणि शोभने।**
**अंगुष्ठेन विना कर्म कृतं तदफलं यतः।।**
**मध्यमानामिकांगुष्ठैः अक्षमालामणीशतैः।**
**एवं जपस्य चैकस्य क्रमोऽयं चालयेज्जपेत्।।**
**अंगुष्ठेन तु मोक्षाय मध्यमाघविवृद्धये।**
**जपेदनामिकांगुष्ठैर्नेतराभ्यां कदाचन।।**
**अंगुष्ठ-मध्यमायोगात्सर्वसिद्धिप्रदासने।**
**अंगुष्ठमध्यमाभ्यां च चालयेन्मध्यमध्यतः।।**
**तर्जन्या न स्पृशेदेनां मुक्तिदो गणनक्रमः।।''**

– शिवाज्ञा विद्याग्रंथ

उपर्युक्ताधारेण साधकः यदि मन्त्राणां उपासनां करोति तर्हि निश्चितरूपेण सिद्धिं प्राप्नोति। इदानीं दैनिकजीवने कार्यसिद्ध्यर्थं फलप्राप्त्यर्थं अधोलिखिताः महत्त्वपूर्णाः मन्त्राः सन्ति, यथा –

**• धनधान्यसमृद्धिप्राप्त्यर्थं**

**1. कुबेरमन्त्रः**

**''ॐ यक्षाय कुबेराय वैश्रवणाय धनधान्य-समृद्धिं मे देहि दापय दापय स्वाहा।''** अस्य मन्त्रस्य प्रयोगः शिवालये करणीयः। जपसंख्या एकलक्षम् भवेत्।

**2. दारिद्र्यनाशकमन्त्रः**

**''ॐ श्रीं ॐ ह्रीं श्रीं क्लीं श्रीं क्लीं विघ्नेश्वराय नमः मम दारिद्र्यनाशं कुरु कुरु स्वाहा।''**

**3. धनवृष्टिकारकः मन्त्रः**

**''ॐ हंसि हंसि जने ह्रीं क्लीं स्वाहा।''**

अस्य मन्त्रस्य जपः ग्रामात् बहिः एकान्तस्थाने करणीयः तथा च मन्त्रोपासनापश्चात् कमलपुष्पैः दशांशहवनकार्यमपि अपेक्षितम्।

**4. गुप्तधनज्ञानार्थः मन्त्रः**

**''ॐ ह्रीं पद्मावति देवि त्रैलोक्यवार्ता कथय कथय ह्रीं स्वाहा।** शयनात् पूर्वम् अस्य एका माला करणीया। मन्त्रस्य प्रभावेण स्वप्नकाले गुप्तधनस्य ज्ञानं भविष्यति।''

**5. धनाकर्षणाय मन्त्रः**

**''ॐ मधुमति दिशाः स्थावरजङ्गमसागरपुर-रत्नानि सर्वेषामाकर्षिणि ठं ठं ठं स्वाहा''**

**6. धनप्रदनृसिंहमन्त्रः**

**''ॐ नृं नृं नृं नृसिंहाय नमः।''**

**7. श्रीलक्ष्मीनृसिंहमन्त्रः**

**''ॐ ह्रीं क्ष्रौं श्रीं श्रीलक्ष्मीनृसिंहाय नमः''**

अस्य मन्त्रस्य प्रतिदिनम् एकां मालां यः करोति अथवा सपादलक्षमन्त्राणामनुष्ठानम् कारयति सः लक्ष्म्याः कृपां प्राप्नोति।

- **शत्रुनाशकाः मन्त्राः -**

**1. हनुमन्मन्त्रः**

**''ॐ ऐं ह्रीं हनुमते रामदूताय लंकाविध्वंसनाय अंजनिगर्भसम्भूताय शाकिनीडाकिनीविध्वंसनाय किलिकिलिबुबुकारेण विभीषणाय हनुमद्देवाय ॐ ह्रीं श्रीं ह्रौं ह्रां फट् स्वाहा।''**

यदि अस्य नित्यम् एकां मालां जपेत् तर्हि सर्वकार्येषु सिद्धिं प्राप्नोति मानवः।

**2. ''ॐ ह्रीं श्रीं ज्वालामुखि मम सर्वशत्रून् भक्षय भक्षय हुँ फट् स्वाहा।''**

- **राजकार्यसिद्ध्यर्थं मन्त्राः -**

**1. राजवशीकरणाय मन्त्रः**

**''ॐ ह्रीं सः भोजराज वशकरि ( अमुकं ) मे वशं कुरु ह्रीं स्वाहा।''**

**2. राजकार्यस्य सिद्धिमन्त्रः -**

**''ॐ ऐं क्लीं ह्रीं श्रीं त्रिपुरसुन्दर्यै नमः।''**

**3.''ॐ श्रीं श्रीं ॐ ॐ श्रीं श्रीं हुं फट् स्वाहा।''**

**4. सभायां विजयार्थम् -**

**''ॐ ह्रीं श्रीं कीर्तिकौमुदि वागीश्वरि प्रसन्नवरदे कीर्तिमुखमन्दिरे स्वाहा।''**

**5. जयप्रदमन्त्रः - ''ॐ जय जय श्रीनृसिंह''**

**6. स्वामिसम्मुखे विजयार्थम् - ॐ हुँ फट्।**

अस्य मन्त्रस्य एकलक्षजपपश्चात् स्वामिसम्मुखे गमनं भवति चेत् सफलता अवश्यमेव प्राप्यते इति न संशयः।

- **सर्वार्थसिद्ध्यर्थं मन्त्रः**

**''ॐ ह्रीं श्रीं भगवति चिन्तामणि सर्वार्थसिद्धिं देहि देहि स्वाहा''**। नवरात्रौ रात्रिकाले अस्य मन्त्रस्य जपः कल्याणकारी भविष्यति।

- **आत्मोन्नतिकारक मन्त्रः**

**''ॐ तत्पुरुषाय विद्महे, महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात्''।**

- **मनोकामनापूर्तिमन्त्रः**

**''ॐ ह्रीं श्रीं क्लीं मम सर्ववाञ्छितं देहि स्वाहा।''**

मन्त्रस्य शीघ्रं तथा सम्पूर्णफलप्राप्त्यर्थम् आवश्यकं वर्तते यत् शुद्धिः (शरीर-मन-ध्यान-स्थान-भूमिः), उच्चारणं तथा उपर्युक्तविधि-नियमानां पालनं, धैर्यम् इत्यादयः। जपकाले अतिशीघ्रता न करणीया। यस्य देवतायाः मंत्रोऽस्ति तस्य देवतायाः एकाग्रतापूर्वकध्यानं आवश्यकं वर्तते। यथा उल्लिखितं वर्तते, यत्-

**जितासनो जितश्वासो जितसंगो जितेन्द्रियः।**
**स्थूले भगवतो रूपे मनः संधारयेद् धिया।।**

श्रीमद्भागवतमहापुराणम् 2/1/23

अनेन शोधपत्रेण जनाः दैनिकजीवने आगतानां बाधानां निराकरणं श्रद्धया विश्वासेन च करिष्यन्ति। एते मन्त्राः कार्यसिद्ध्यर्थं उपयोगिमन्त्राः सन्ति एषः मम विश्वासः।

सन्दर्भग्रन्थाः

1. पुरश्चरणचंद्रिका 2. मन्त्रमहार्णवः 3. फेत्कारिणी तंत्रम् 4. मंत्रमहोदधिः 5. शिवाज्ञाविद्याग्रंथः 6. मंत्रशक्तिः 7. श्रीमद्भागवतमहापुराणम्

**विजिटिंग प्रधानाचार्यः**
V.J.M.S. (MSDTF)
**गुडलैड्स, मॉरिशस**

**संस्कृतसमाचारः**

## ग्वालियरे शिबिरमाला

ग्वालियरम्-संस्कृतसम्भाषणशिबिराणां महत्त्वं ज्ञात्वा संस्कृतभारती सम्पूर्णे महानगरे नैकेषु स्थानेषु संस्कृतसम्भाषणशिबिरमालां आयोजयति। अस्यां शिबिरमालायां प्रतिमासं शिबिरत्रयं भवति। एतानि शिबिराणि ग्वालियरस्य भिन्न-भिन्नक्षेत्रेषु आचर्यन्ते। प्रान्तीयावासीयवर्गात् नर्मदापुरात् प्रेरणां प्राप्य गतजूनमासस्य त्रयोदशदिनांकात् सर्वेऽपि कार्यकर्त्तारः महता उत्साहेन शिबिराणि संयोजयन्ति, संचालयन्ति च। एतानि सर्वाणि अपि शिबिराणि सामाजिकानि एव भवन्ति। अस्मिन् क्रमे प्रथमं शिबिरं शासकीय-महारानी-लक्ष्मीबाई-उत्कृष्ट-महाविद्यालये आरब्धम् आसीत्, ततः हरिशंकरपुरे, ताराविद्यापीठे, बिरलानगरे, चेतकपुर्याम्, रामजानकीमन्दिरे, विवेकानन्दमार्गे, संस्कारधाम्नि, मुरारे नगरे च शिबिराणि संचालितानि। क्वचित् मन्दिरे, क्वचित् उद्याने महाविद्यालये च एतानि शिबिराणि महता उत्साहेन सम्पन्नानि भवन्ति।

एतैः शिबिरैः ग्वालियरमहानगरे संस्कृतमयं वातारवणं जायमानम् अस्ति। समाजजनाः, शिक्षकाः, संस्थाः च प्रभाविताः भूत्वा स्वक्षेत्रे शिबिराणि इच्छन्ति। शिबिरे सम्पन्ने सति तस्मिन् स्थाने साप्ताहिकमेलनम् संचाल्यते। तत्र गीतानां, स्तोत्राणां, शिबिरबिन्दूनां, भाषाक्रीडानां, सम्भाषणादीनां च अभ्यासः कार्यकर्तृभिः कार्यते। एतेन जनाः पत्राचारच्छात्ररूपेण, सम्भाषण-सन्देशसदस्यत्वेन, सरलसंस्कृतपरीक्षामाध्यमेन च संस्कृतं पठितुं प्रवृत्ताः भवन्ति।

संस्कृतसप्ताहावसरे क्रियमाणेषु कार्यक्रमेषु प्रथमं तावत् तिलककरणं, सम्पर्कः साहित्यविक्रयः, वेदपूजनम्, शोभायात्रा, वीथीनाटकानि, व्याख्यानानि च इत्यादयः अंगभूत-कार्यक्रमाः सम्पन्नाः।

**धनंजयशर्मा**
**महानगरसंयोजकः, संस्कृतभारती, ग्वालियरम्**

## श्लोकसमस्यापूर्तिपुरस्काराः

दिल्ली-संस्कृत-अकादम्या समायोजितायाम् अखिलभारतीय-श्लोकसमस्यापूर्तिप्रतियोगितायां राजस्थानस्या त्रयो विद्वत्तज्जनाः सम्मानिताः अभवन्। प्रतियोगितायामस्याम् अजमेरनगरतः राष्ट्रपतिसम्मानिताः विद्वांसः पं. सत्यनारायणशास्त्रिमहोदयाः अखिलभारतीय-स्तरे द्वितीयपुरस्कारेण, जयपुरतः डॉ. राजेशकुमारगुप्त-महोदयाः चतुर्थपुरस्कारेण तथा च पं. रामस्वरूप दोतोलियामहाभागाः पञ्चमपुरस्कारेण सभाजिताः।

# भारतीमञ्जुनिकुञ्जम्

## ( पूर्वानुवृत्तम् )

❑ डॉ. रामनारायण झा

### विश्वकल्याणविधाता तटस्थधर्मवादी विवेकानन्दः

साम्प्रतं भारतं लोच्यते यन्मया,
ज्ञानवृद्धं समृद्धं प्रशस्यं दमी।
तस्य कर्ता विवेकी विवेकः क्षमी,
हा कथं भारते आहता भारती।। २९३।।

### कः विद्वान्

सौरभं सारगं सात्त्विकं सत्प्रियं,
शब्दवर्जं विसृज्यार्थमेनं नवम्।
तद्गतं तात्त्विकं चाश्नुतेऽहर्निशम्,
आहता भारती भारते हा कथम्।। २९४।।

मज्जयन् विग्रहं फेनिलैः सज्जयन्,
वारिभिर्वाससालंकृतैर्वानिशम्।
वीक्षते नात्मतत्त्वन्निजं वै कदा ?
हा कथं भारते भारती आहता।। २९५।।

वेदवेदान्तवैयाकृतम्पापठन्,
गेयगीतां रुचा ज्यौतिषं चेन्न वा?
स श्रमः कृष्णपादाब्जभक्तिं विना?
हा कथं भारते भारती आहता।। २९६।।

गाहकश्चाम्बुधौ गाहते हा मणिं,
केवलं लिप्सुरेकस्ततश्श्राम्यति।
वीप्सुकं वाचमर्थन्नरं धिक्तथा,
हा कथं भारते भारती आहता।। २९७।।

वीक्षकैर्हा रसो यैश्चलच्चित्रकं
नानुभूयेत काव्यं हितं तं चिरम्।
पापठद्भिश्च पाषाणवत्तत्तथा,
हा कथं भारते भारती आहता।। २९८।।

वाणीमर्थं स बिभ्राणको मृत्तिकां,
भारवाहो रसानान्नसंस्वादकः।
कोविदाद्यो गरीयान् क्रियावानतः,
भरती भारते हा कथम् आहता।। २९९।।

सुसराष्ट्रं समस्तं सदा बोधयन्,
पाठयञ्ज्ञानहीनं जनञ्चानिशम्।
बृंहयन् स्वाभिमानं नराणामिदम्,
आहता भारते भारती हा कथम्।। ३००।।

स्थापयामास धीरो धरित्रीसुतो–
ध्यात्मवादं शिकागोधरायामिदम्।
गौरवं भारतीयं पुराणं बहिः,
आहता भारते हा कथम् भारती।। ३०१।।

### पुरातनसंविधानं धर्मशास्त्रम्

धर्मशास्त्राणि चाचक्षते विंशतिः,
मानवीयं समस्तं विधेयं विधिम्।
संविधानं वदामोऽद्य एतत्सखे,
हा कथं भारती आहता भारते।। ३०२।।

कर्म चाकर्म नौ भाष्यमावश्यकं,
वेदसूक्तं स्मृतौ तन्निषिद्धञ्च तत्।
सूत्रमाम्नायवाच्यं विविस्तारितम्,
आहता भारते भारती हा कथम्।। ३०३

मानवं याज्ञवल्क्यीयमाद्यन्तत–
श्चाद्य सिद्धं हि पाराशरीयं कलौ।
सर्वतस्सारमादाय यामो पथि,
हा कथं भारते आहता भारती।। ३०४।।

### भारतीयाद्भुतचिकित्साशास्त्रम् आयुर्वेदः

आयुषां यत्र मानं हितञ्चाहितं,
दुःखसौख्यञ्चतुर्धेति शास्त्रे कृतम्।

वैद्यकं तद्धि दोषापहं शासनम्,
आहता भारते भारती हा कथम्।। ३०५।।
आयुषो वेद उक्तोऽप्ययं वैद्यके,
संहिताः चारकस्सुश्रुतश्च त्रिधा।
मुख्यजाता अमी शब्दभट्टश्च ताः,
हा कथं भारते भारती आहता।। ३०६।।
कायजन्यं मलं दूरयेच्चारकस्-
सुश्रुतश्शल्यजातं मलं वारयेत्।
शब्दभट्टो निदाने प्रधीः वैद्यके,
हा कथं भारती आहता भारते।। ३०७।।

## सांस्कृतिकी नारी

सा च धर्म्या हि नुः नारिका सुक्रिया,
भाषते सत् प्रियं प्रेयसीव प्रिया।
निष्कुहा सत्पथं लक्षयन्ती च या,
भारती भारते हा कथम् आहता।। ३०८।।

## सनातनी वृक्षपूजिका भारतीयसंस्कृतिः

विष्णुरूपः प्रियः पिप्पलः प्राणदः,
रक्षति प्राणिनो वायुभिस्स्वैस्सदा।
प्राणसंचारकैः सोऽत्र पूज्यो दिवा,
हा कथं भारते भारती आहता।। ३०९।।
सोऽपि विष्णुर्हि धात्रीति चाख्या सुधा-
स्यन्दिनी वैद्यके मातृवत्तोषिका।
स्त्रीभिरिड्याक्षतार्थन्नु पत्यू रुचा,
हा कथं भारते भारती आहता।। ३१०।।
वञ्जुलो रम्भिका वा वटो मंजुलः,
रोहको न्यक् रसालो रसागारकः।
अग्निगर्भा शमी चेह नम्या अमी,
हा कथं भारते आहता भारती।। ३११।।
पादपः पल्लवैः पाति वृन्दाभिधः,
नीपकश्चार्चनीयोऽपि कृष्णप्रियः।
भूमगुण्यैस्स बिल्वः फलैर्यो भुवि,
हा कथम् आहता भारते भारती।। ३१२।।

**व्याख्याता (संस्कृतम्)**
**राजकीयकल्याणमहाविद्यालयः, सीकरम्**

गांधीजयन्त्यवसरे -

## महितो महात्मा

❑ डॉ. प्रशस्यमित्रशास्त्री

**सिद्धान्त-निष्ठ-नियमादिनियन्त्रितं यत्,
सत्कर्म-संस्कृति-समुन्नतजीवनं यत्।
सत्यप्रसाधन-धनी-धवलोऽध्वनीनः,
कर्माणि साधयति मोहनदासगांधी।। १।।
सत्याऽऽग्रहाऽस्त्र-बल-कम्पितशासनः सः,
नेता सदैव जनमानस-शोक-हर्ता।
सद्भावना-विनय-नीतिनियामकोऽयम्,
देशे सदा विजयते सुकृती महात्मा।। २।।
गौराङ्गशासनमशोभनमेव देशे,
उच्छ्वस्य यस्त्वसहयोगबलेन काले।
स्वातन्त्र्य-शंखमतिसुन्दरघोषयुक्तम्,
संध्यातवान् मुहुरहो महितो महात्मा।। ३।।**

## गान्धिनस्त्रयो वानराः किमुपदिशन्ति ?

**आश्वासनानि वितथानि तु राजनीत्याम्।
सत्यं वदेदिह कदापि न नेतृवर्गः।
संकेतयन् कविरयं प्रथमः पुरस्तात्
हस्ताङ्गुलिं हि निदधाति मुखे स्वकीये।
निर्वाचनस्य विषमे समये समाप्ते,
कष्टानि नैव शृणुतां जनमानसानाम्।
हस्तांगुलिं श्रवणयोरुपरि प्रकुर्वन्,
संकेतमावहति चैष कपिर्द्वितीयः।।
हत्याबलात्कृतिपरं बहु भ्रष्टकार्यम्,
उत्कोचवित्त-परिणाम-महाधनत्वम्।
नैतद् विलोक्यमिति नेतृजनैस्तृतीयः,
संकेतयन् कपिरयं नयनं पिधत्ते।।**

**बी-29, आनन्द नगर**

# प्रसिद्धशिक्षाग्रन्थेषु शब्दोच्चारणप्रक्रियायाः विवेचनम्

❑ रामचन्द्र जाटः

**नारदीयशिक्षाग्रन्थस्य शब्दोच्चारणप्रक्रियायाः सामान्यपरिचयः-**

वेदांगेषु शिक्षा प्रथममंगं भवति। वेदांगानि षट् भवन्ति। एतेषां क्रमबद्धः तथा प्राचीनतमोल्लेखः एवं विद्यते – **तस्मै स होवाच-द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति परा चैवाऽपरा च। तत्राऽपरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः, शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। अथ परा यया तदक्षरमभिगम्यते।**

आपस्तम्बधर्मसूत्रेऽपि वेदांगानामुल्लेखो विद्यते। परं तु तत्र क्रमे, नाम्नि च भेदः दृश्यते। ''षडंगो वेदः छन्दः कल्पो व्याकरणं ज्योतिषं निरुक्तं शिक्षाच्छन्दोविचिति-रिति। अत्र शिक्षाशब्दे इकारस्य दीर्घत्वं तैत्तरीयोप-निषदः प्रयोगस्यानुरूपेण अकरोत्।''

**वेदे व्याकरणादीनि सन्त्येवाऽऽभ्यन्तराणि नः।**
**भवेद् वा तदभिप्रायः षडंगाध्ययनस्मृतिः।। इति।।**

**1. नारदीया शिक्षा-**

भारतवर्षीयपरम्परा अनादि विद्यते। अपौरुषेयवेदेषु गानस्य उल्लेखो बहुत्र दृश्यते। यथा-ऋग्वेदे-

**छेवा अंगिरसां सामभिः स्तूयमानाः। गायन् साम नान्यं यथा वः। उद्‌गातेव शकुने साम गायसि। यो जागार तमु सामानि यन्ति। यूयमृषिमवथ सामविप्रम। ( ऋग्वेदः............ )**

इत्यादिस्थलेषु गेयसाम्नां, सामगानानां वोल्लेख उपलभ्यते।

**ऋग्वेदे च -**

**तस्माद् यज्ञात्सर्वहुतः। ऋचः सामानि जज्ञिरे ।**
**छन्दांसि जज्ञिरे तस्मात् यजुस्तस्मादजायत।**

इत्यनेन मन्त्रेण साम्नामुत्पत्तिरप्युल्लिखिता वर्तते।

**यजुर्वेदस्योल्लेखे** सामविशेषस्य ऋतु-ऋषि-स्तोमादिभिः विशेषसम्बन्धोऽपि प्रस्तुतः। गीताय शैलूषम्। इति यजुर्वेदीयं वचनं सामगानस्य विशिष्टस्थितिं परिचाययति। सामवेदस्तु साममय एव भवति। अत एव जैमिनिमुनिना प्रतिपादितं यत् गीतिषु सामाख्या इति, धर्ममीमांसासूत्रे।

**अथर्ववेदे- ऋचं साम यजामहे याभ्यां कर्माणि कुर्वते। एते सदसि राजतो यज्ञ देवेषु यच्छतः।**

**यथा -**

**गीतं वाद्यं तथा नृत्यं त्रयं संगीतमुच्यते।**
**मार्गो देशीति यद् द्वेधा तत्र मार्गः स उच्यते।।**

नारदीयशिक्षा मुख्यतः मार्गपद्धतेः गानशास्त्रग्रन्थो विद्यते। अस्याः प्रथमप्रपाठके प्रधानतया गानसम्बद्ध-विषया एव प्रस्तुताः। अयं भागः सामवेदस्य गानसंहितया सम्बद्धः। द्वितीयप्रापाठके सामवेदस्य आर्चसंहितया, आर्चिकसंहितया च सम्बद्धाः, सामान्य-शिक्षासम्बद्धविषयाश्च वर्णिताः। वस्तुतः नारदीयशिक्षा संगीतशास्त्रसम्बद्धा, गानशास्त्रसम्बद्धा वा नास्ति। परं स्वरशास्त्रसम्बद्धा वर्त्तते। कुत इति चेदस्यां शिक्षायां मुख्यपाठे वेदनिश्चयस्य वचनानि सन्ति। अस्यां शिक्षायाम् आर्चिक-सामिकस्वराणां चर्चा विद्यते। अत एवेयं वेदविद्भिः वेदाङ्गशिक्षाशास्त्रत्वेनांगीकृता। अस्यां शिक्षायां वारं-वारं साम्नः प्रस्तावः समागतः।

अस्यां वेदशाखासु कठ-कालाप-तैत्तरीय-आह्वरक-ताण्डि-भाल्ल-वाजसनेयिशाखानामुल्लेखो लभ्यते। शतपथब्राह्मणस्याप्युल्लेखोऽस्ति-

**द्वितीयप्रथमावेतौ ताण्डिभाल्लविनां स्वरौ।**
**तथा शातपथावेतौ स्वरौ वाजसनेयिनाम्।**
**अस्यां ब्रह्मणः चिन्तनविधिनामपि विहितम्।**
**कौक्षेयाग्निं सदा रक्षेदश्नीयादशनं हितम्।**
**जीर्णहारः प्रबुद्धः सन्नुषसि ब्रह्म चिन्तयेत्।।**

सार्ववेदिकस्वराणाञ्च चर्चा सम्यक् कृता। यथा-

**एते विशेषतः प्रोक्ताः स्वरा वै सार्ववैदिकाः।**

**नारदीयशिक्षायां वर्णोच्चारणविधिः-**

**१. वर्णोच्चारणे सावधानविधिः-**

**कूर्मोऽङ्गानीव संहृत्य चेष्टां दृष्टिं दिशं मनः।**
**स्वस्थः प्रशान्तो निर्भीतो वर्णानुच्चारयेद् बुधः।।**

प्रकृतिस्थः, प्रशान्तचित्तो, भयरहितश्च विज्ञः अध्येता कूर्मः स्वांगानीव चंचलतां, चक्षुर्व्यापारं, दिगवलोकनं, चित्तव्यापारं चोपसंहृत्य सावधानमना सन् वर्णान् उच्चारयेत्।

**२. वाक्योच्चारणे हस्तमुखसंवादिविधिः-**

**सममुच्चारयेद्वाक्यं हस्तेन च मुखेन च।**
**यथैवोच्चारयेद्वर्णांस्तथैवैतान् समापयेत्।।**

क्रुष्टादिस्वरविशिष्टं वाक्यं हस्ते करणीयेन स्वरांगितेन सहैव मुखेनाऽप्युच्चरेत्। पठनीयस्य मन्त्रवाक्यस्य वर्णान् आदौ यथा द्रुतादिवृत्या उच्चारयेत् तेनैव वृत्या समापयेत्।

**३. स्वरादन्यस्वरोच्चारणविधिः -**

**स्वरात् स्वरं सङ्क्रामंस्तु स्वरसन्धिमनुल्बणम्।**
**अविच्छिन्नं समं कुर्यात् सूक्ष्मं छायाऽऽतपोपमम्।।**

एकं स्वरमुच्चार्य अन्यं स्वरमुच्चरितुं प्रवृत्ते वेदपाठी तयोः द्वयोः स्वरयोः सन्धिम् अनुत्कटम्, अविच्छिन्नं सुसंघटितञ्च छायाया आतपस्य च सन्धिना समानं सूक्ष्मं कुर्यात्।

**४. ग्रन्थोच्चारणशिक्षकशिक्षणविधिः -**

**गृहीतग्रन्थ एवं तु ग्रन्थोच्चारणशिक्षकान्।**
**हस्तेनाऽऽध्यापयेच्छिष्याञ्छैक्षेण विधिना द्विजः।।**

वेदांगशिक्षास्त्रोक्तेन प्रकारेण गुरुमुखतः अवाप्तो-च्चारणानूच्चारणरूपाध्येत्रा स्वशाखासम्बद्धवेदादिग्रन्थाः समधिगताः। एतादृशो ब्राह्मणः वेदग्रन्थस्योच्चारणं शिक्षितुं तच्छाखाध्ययनेऽधिकारिणः शिष्यान् स्वरादिनिर्देशपूर्वकेण हस्तेन स्वरवेदादिग्रन्थस्य साधूच्चारणं शिक्षयेत्।

**सम्यग्वर्णोच्चारणफलम्-**

**एवं वर्णाः प्रयोक्तव्या नाऽव्यक्ता न च पीडिताः।**
**सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते।।**

**संदर्भ-ग्रन्थाः -**


१. अथर्ववेद, श्रीपाद दामोदर सातवलेकर, स्वाध्याय मण्डल- १९८५
२. ऐतरेयब्राह्मण, चौखम्बा संस्कृत संस्थापन, वाराणसी-१९८७
३. वेदांगशिक्षा का महत्त्व, डॉ. आलोक शर्मा, रा.सं. साहित्य केन्द्र, जयपुर-२००४
४. नारदीयशिक्षा, दतिया, मध्यप्रदेश-१९६६
५. नारदीयशिक्षा, पं. दत्तात्रेय शास्त्री, गान्धर्व-महाविद्यालय, लाहोर-१०६७
६. नारदीयशिक्षा, भाण्डारकर प्राच्य विद्या संशोधन मन्दिर, पुण्यपत्तनम्-१९८६
७. श्रीनारदीयशिक्षा, शिवराज आचार्य, कौण्डि-न्न्याय:, चौखम्बा विद्या भवन, वाराणसी-२००२



**व्याकरणाचार्यः**
**ज.रा.रा.सं. विश्वविद्यालय, जयपुरम्**

नारी-स्तम्भः

# सम्मान्या कन्या सदा

❑ डॉ. राजेश्वरीभट्ट

2016 तमे वर्षे 10 सितम्बरदिने राजस्थान राज्यस्य राजधान्यां जयपुरनगर्यां राजस्थान-सर्वकारस्य, राजस्थान संस्कृत अकादम्याः संस्कृत भारत्याश्च्च सहयोगेन प्रयासेन च 'वेदेषु शक्तितत्त्वम्' इति विषयमाधारीकृत्य विराडा-योजनं जातम्। समारोहेऽस्मिन् 5100 वेदाध्ययनरतैः प्रशिक्षिकयुवकैरुद्घोषितेन 'श्रीसूक्तस्य' मन्त्राणां सामूहिकपाठेन वेदेषु निहितायाश्चिदात्मिकायाः शक्तेराह्वानं कृतम्। सहैव राष्ट्रस्य वेदविज्ञैः पण्डितैः-

मन्त्राक्षरमयीं लक्ष्मीं मातॄणां रूपधारिणीम्।
नवदुर्गात्मिकां साक्षात् कन्यामावाहयाम्यहम्।

एवमेव अन्यैश्च कन्यानां महिमानमुद्घाटयद्-भिरनेकैर्मन्त्रैः 108 कन्यानां पूजनं विहितम्। भव्यमिदमायोजनं नूनं भारतीयपरम्परायाः पोषकं, राष्ट्रे कन्यासम्मानस्य प्रतिष्ठापकमासीत्।

भारतेदेशे युगयुगेभ्यः कन्या देव्याः प्रतिमूर्तिरिव सम्मान्याऽस्ति। कन्यानां पूजनं, सम्मानः, वन्दनञ्च मङ्गलं मन्यते। पारिवारि-कोत्सवेषु, समारोहेषु, पावनपर्वसु, मङ्गलकार्येषु च कन्यानां पूजनं कृत्वा मानवा धन्यानात्मनो मन्यन्ते। 'महाभारतग्रन्थरत्ने' नारदयुधिष्ठिरयोर्मध्ये प्रवृत्ते संवादे लोके कन्यापूजनस्य मूलकारणं ज्ञातुं समुत्सुकं युधिष्ठिरं प्रति महर्षेर्नारदस्य वचना-न्यत्रोलेखनीयानि सन्ति।

नित्यं निवसते लक्ष्मीः कन्यकासु प्रतिष्ठिता।
शोभना शुभयोग्या च पूज्या मङ्गलकर्मसु।।
आकरस्य यथा रत्नं सर्वकामफलोपमम्।
तथा कन्या महालक्ष्मीः सर्वलोकस्य मङ्गला।।

महाभारत, अनुशासनपर्व।

ऋषिमहर्षिभिः प्रतिष्ठापिता, शास्त्रैः समर्थिता परिवारेषु पोषिता कन्यापूजनस्य मङ्गलमयी परम्परा राष्ट्रे अद्यापि सम्मान्या अभिनन्दनीया च वर्तते। प्रतिवर्षं शक्तिपूजामहोत्सवे निखिले राष्ट्रे गृहे गृहे कन्यानां पूजनं विधीयते श्रद्धाभरिता गृहस्थजनाः तिलकेन वस्त्रैः पुष्पमालाभिः भोजनेन स्तुतिमन्त्रैः विविधोपहारैश्च कन्यानां पूजनं कृत्वा कृतार्थतामात्मनः कुर्वन्ति। दृश्यते यत् अर्थ-प्रधानेऽस्मिन् युगे अनेकैः सामाजिक भौतिक पारिवारिक-कारणैश्च कंठहारसदृशी प्रिया कन्या अद्य परिवारजनानां कृते भारस्वरूपा जाता। विवाहावसरे यौतुकप्रथायाः प्रचलनेन लिङ्गभेदेन, यौनोत्पीड़नेन पितरौ कन्याया जन्म अभिशापमिव मन्यन्ते। भ्रूणहत्यायाः समाचाराः प्रतिदिनं दूरदर्शनमाध्यमेन, समाचारपत्रैश्च श्रूयन्ते। सम्प्रति अगस्तमासे जयपुरनगरे एकस्मिन् सम्भ्रान्ते परिवारे पुत्रस्य कामनां कुर्वत्या जनन्या आत्मनश्चतुर्मासस्य पुष्पसदृशकोमलाया पुत्र्या हत्या कृता। कन्यानां विषये यदि जनानां चिन्तनं एवमेव भविष्यति तर्हि राष्ट्रे कन्यानां स्थितिः शोचनीया भविष्यति। कन्या गृहस्य शोभा वर्तते। सा सदा सम्माननीयाऽस्ति।

## हिन्दी अनुवाद

10 सितम्बर 1916 को राजस्थान राज्य की राजधानी जयपुर नगरी में राजस्थान सरकार- राजस्थान संस्कृत अकादमी एवं संस्कृतभारती के समन्वित संकल्प एवं प्रयास से 'वेदों में शक्तितत्त्व' विषय पर विराट् आयोजन किया गया। इस समारोह में वेद के अध्ययन में लगे हुए प्रशिक्षित 5100 युवकों द्वारा 'श्रीसूक्त' के मन्त्रों के सामूहिक पाठ के उद्घोष से वेदों में निहित चिदात्मिका शक्ति का आह्वान किया साथ ही राष्ट्र के वेदविज्ञ पण्डितों के द्वारा मन्त्राक्षरमयी मातृरूपधारिणी नवदुर्गारूप में व्याप्त कन्या का आह्वान करते हुए अनेक स्तुतिमन्त्रों के साथ 108 कन्याओं का पूजन किया गया यह भव्य आयोजन निश्चय ही भारतीय परम्परा का पोषक एवं राष्ट्र में कन्या सम्मान का प्रतिष्ठापक था।

भारतवर्ष में कन्या युगयुगों से देवी की प्रतिमूर्ति के रूप में सम्मान्या है। कन्या का पूजन, वदन, सम्मान मङ्गल विधायक माना जाता है पारिवारिक उत्सवों में समारोहों में पावन पर्व पर मङ्गलकार्यों में कन्या का पूजन सम्पन्न कर व्यक्ति अपने को धन्य मानते हैं। महाभारत ग्रन्थरत्न में नारद एवं युधिष्ठिर के मध्य होने वाले संवाद के प्रसंग में लोक में कन्या पूजन के मूल कारण को जानने के लिए समुत्सुक युधिष्ठिर से कहे हुए नारद के वचन यहाँ उल्लेखनीय है -

**कन्याओं में लक्ष्मी का नित्य निवास है कन्याओं का पूजन मंगल कार्यों में शुभ होते हैं, कन्या सर्वकामनाओं की फलदायित्रनी है, वह महालक्ष्मी है, एवं सर्वलोक की मङ्गलकारी है।**

**महाभारत, अनुशासनपर्व**

ऋषि महर्षियों द्वारा प्रतिष्ठापित, शास्त्रों द्वारा समर्पित, परिवारों में पोषित कन्यापूजन की मङ्गलमयी परम्परा आज भी सम्पूर्ण राष्ट्र में प्रचलित है, प्रतिवर्ष 'शक्तिपूजा' महोत्सव पर घर-घर में नवकन्याओं का पूजन किया जाता है। श्रद्धालु, गृहस्थजन, तिलक, पुष्पमाला, भोजन, वस्त्र तथा अन्य उपहारों से कन्याओं का पूजन कर अपने को कृतार्थ करते हैं। किन्तु प्रतीत होता है कि इस अर्थ प्रधान युग में अनेक सामाजिक, आर्थिक एवं पारिवारिक परिवर्तनों के कारण गले में सुशोभित होने वाले हार के समान प्यारी लगने वाली कन्या आज भार लगने लगी है।

विवाह के अवसर पर दहेज प्रथा के प्रचलन से, समाज में व्याप्त लिङ्गभेद के कारण, यौन शोषण के कारण माता-पिता, कन्या के जन्म को अभिशाप समझते हैं। भ्रूण हत्या के हृदय विदारक समाचार प्रतिदिन दूरदर्शन एवं समाचारपत्रों के माध्यम से प्रकाशित होते रहते हैं। अभी हाल ही में अगस्त मास में जयपुर नगर में रहने वाले एक सम्मान्य परिवार में पुत्र की कामना करने वाली माँ के द्वारा अपनी चार महीने की पुत्री की स्वयं ही अपने हाथों से हत्या कर दी गई। कन्याओं के विषय में यदि लोगों का चिन्तन स्वस्थ नहीं होगा तो राष्ट्र में कन्याओं की स्थिति शोचनीय ही होगी। कन्या घर की शोभा है, वह सदा ही सम्माननीय है।

आयुर्वेद-स्तम्भः

# वैद्यानां शारदी माता

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**वर्षर्त्वनन्तरं शरत् समागच्छति। शरद्यर्करश्मयोऽतितीक्ष्णा भवन्ति, तीक्ष्णाभी रश्मिभिः सुतप्तानां शरीराणामाचितं पित्तं प्रायः प्रकुप्यति। चितं प्रकुपितञ्च पित्तं प्रायः ज्वरकारि भवति। शरीरे निश्चितरूपेणोष्मा पित्तादृते नास्ति, ज्वरो नास्त्यूष्मणा विना। अत एव कालेऽस्मिन् ज्वरस्योत्पत्तिर्विशेषेण जायते। वर्षासु सर्वत्र क्लेदस्य संस्थितिर्भवति, तेन हि मशकानां सूक्ष्माणाञ्च कीटाणूनां समुत्पत्तिः जायते। ते मशकाः कीटाणवश्च शरदि विशेषेण प्रसृतिं लभन्ते। शरदि तु तैः संसृष्टेषु जनेषु प्रायः ज्वरोत्पत्तिर्भवति। अधिसंख्यकाः जनाः विभिन्नैः ज्वरभेदैः पीडिता भवन्ति, चिकित्सार्थञ्च वैद्यानां समीपे आगच्छन्ति। वैद्याः कालेऽस्मिन् व्यवसाय-व्यस्ता भवन्त्यत एवोक्तिरियं चरितार्था भवति, यत् 'वैद्यानां शरदी माता'**

वर्षा ऋतु के बाद शरद ऋतु आती है। शरद् में सूर्य की किरणें अत्यन्त प्रखर होती हैं। तीक्ष्ण किरणों से सुतप्त शरीरों में सञ्चित पित्त प्रायः प्रकुपित होता है। सञ्चित और प्रकुपित पित्त प्रायः ज्वर करने वाला होता है। शरीर में निश्चित रूप से पित्त के विना ऊष्मा नहीं होती है और ज्वर ऊष्मा के विना नहीं होता है। इसलिए इस समय में ज्वर की उत्पत्ति विशेष रूप से होती है। वर्षा में सर्वत्र क्लेद (गीलेपन) की स्थिति होती है। उससे मच्छरों की और सूक्ष्म कीटाणुओं (वायरस) की उत्पत्ति होती है। वे मच्छर और टीकाणु शरद में विशेष रूप से फैलते हैं। शरद ऋतु में उनसे संसृष्ट लोगों में प्रायः ज्वरोत्पत्ति होती है। अधिकांश लोग ज्वर के विभिन्न भेदों से पीडित होते हैं और चिकित्सा के लिए वैद्यों के पास आते हैं। इस समय वैद्य व्यवसाय में व्यस्त होते हैं। इसलिए यह उक्ति चरितार्थ होती है कि 'शरद् ऋतु वैद्यों की माता होती है।'

**शरदि सञ्जाते तु ज्वरे प्राथमिकरूपेण पित्तस्य प्राधान्यं प्राबल्यञ्च भवति, प्रबले ह्यस्मिन् ज्वरे सामान्यतया पित्तेन दाहो वमथुस्तृष्णा मूर्च्छा भ्रमोऽरुचिः कण्ठास्यशोषोऽतिसन्तापः स्वप्ननाशश्च जायते। यदा च वातानुबन्धो भवति तदा शिरोरुक् सन्धिशूलं पर्वणांभेदः रोम्णां प्रहर्षणमतिवाक् जृम्भा चोत्पद्यते। यदा तु कफानुबन्धो भवति तदा गौरवं तन्द्रा स्तम्भः स्तैमित्यं शिरोग्रहः प्रतिश्यायः कासः स्वेदाप्रवर्तनञ्च भवति। प्राचीनाचार्यैस्त्वेतादृग्विधानां ज्वराणां विशिष्टैर्नामभिः निर्देशः न कृतः। सर्वत्रैव च दोषानुबन्धं प्रदर्श्य वातपित्त ज्वरः, वातश्लेष्मज्वरः सन्निपातज्वरो वर्तत इति निर्दिश्य तदनुरूपैव चिकित्सा-व्यवस्था निर्दिष्टा। विषमज्वरोऽपि भेदैः सहितः निर्दिष्टः।**

शरद् ऋतु में उत्पन्न होने वाले ज्वर में प्राथमिक रूप से पित्त की प्रधानता और प्रबलता होती है, इस प्रबल ज्वर में सामान्यतया पित्त से दाह, वमन, तृष्णा, मूर्च्छा, भ्रम (चक्कर आना), अरूचि, कण्ठ सूखना मुख सूखना, अत्यधिक ताप (तीव्रज्वर) और निद्रानाश होता है। जब वात का अनुबन्ध होता है तब शिर में पीड़ा (शूल), सन्धिशूल और पर्वों (अङ्गुलियों की सन्धियों) में टूटन, रोंगटे खडे होना, अत्यधिक बोलना (बड़बड़ाना) और जम्हाई आना उत्पन्न होता है। जब कफ का अनुबन्ध होता है तब शरीर में भारीपन की प्रतीति, ऊंघ आना, जकडाहट, प्रतिशयाय, कास, और पसीने की प्रवृत्ति न होना होता है। प्राचीन आचार्यो के द्वारा इस तरह के ज्वरों का विशिष्ट नामों से निर्देश नहीं किया गया है। सभी जगह दोषों के अनुबन्ध को दिखा कर वातपित्तज्वर, वातश्लेष्म ज्वर, सन्निपात ज्वर है ऐसा निर्देश कर के उसके अनुरूप ही चिकित्सा व्यवस्था निर्दिष्ट की गई है। विषमज्वर भी भेदों के साथ बताया गया है।

**वर्तमानकाले तु 'मलेरिया' 'डेंग्यू' 'चिकनगुनिया' 'वायरल फीवर' इत्यादिभिः नामभिः विविधज्वरभेदानां निर्देशः क्रियते नव्यैश्चिकित्सकैः। अतिघातकस्वरूपास्त्वेते ज्वराः जनपदोद्-ध्वंसरूपेण**

**प्रसरिताः भवन्ति। एभिः पीडिताः जनाः म्रियन्ते स्तब्धाङ्गा वा चिरकालपर्यन्तं सन्धिशूलेन पीड्यन्ते निष्क्रियाश्च भवन्ति। एतेषां ज्वराणां चिकित्सा तु चिकित्सकस्य परामर्शं विना न भवति। पुनरप्यत्र केषाञ्चिद्योगानामुल्लेखः क्रियते, येषां प्रयोगः कया अपि चिकित्साव्यवस्थया सह कर्तुं शक्नोति पीडितः जनः। तेन हि कस्यचिदपि ज्वरस्य शीघ्रं निवारणं भवति। यदि च स्वस्थो जनः सेवते तदा ज्वराणां वारणेन स स्वस्थ एव तिष्ठति।**

वर्तमानकाल में तो मलेरिया, डेंग्यु, चिकनगुनिया, वायरल फीवर, इत्यादि नामों से ज्वर के विविध भेदों का निर्देश नवीन चिकित्सकों के द्वारा किया जाता है। अतिघातक स्वरूप वाले ये ज्वर महामारी के रूप में फैलते हैं। इन से पीडित लोग मरते है अथवा जकडे हुए अङ्गों वाले लम्बे समय तक जोडों के दर्द से पीडित होते है और निष्क्रिय हो जाते हैं। इन ज्वरों की चिकित्सा तो चिकित्सक के परामर्श के बिना नहीं होती है, फिर भी यहाँ कुछ योगों का उल्लेख किया जाता है, जिनका प्रयोग किसी भी चिकित्सा-व्यवस्था के साथ पीडित व्यक्ति कर सकता है। उससे किसी भी ज्वर का शीघ्र निवारण होता है। यदि स्वस्थ व्यक्ति सेवन करता है तब ज्वरों के वारण (प्रतिरक्षा) से स्वस्थ ही रहता है।

## पेयोऽति पेयः

**शरदि सञ्जाते कस्मिंश्चिदपि ज्वरे पित्तदोषस्याधिक्येन संस्थितिर्भवत्यत एव पेयोऽति पेयः स्यात्। पेयेषु तु विशेषेण नारिकेलजलस्य, सिकञ्जीनामधेयस्य निम्बुजलस्य च सशर्करस्य पानं विधेयम्। द्राक्षाफलानि दशसंख्यात्मकानि गृहीत्वा सशुद्ध उष्णं कृत्वा पुनः शीतीकृते जले विनीय त्रिहोरानन्तरं सम्यग् विमर्द्य वस्त्रपूतं तत् जलं पिबेत्। एवमेव पिण्डसर्जुराणि गृहीत्वा तत्साधितं शीतं जलं पुनः पुनः पिबेत्। पुनर्नवायाः विनिर्मितस्यार्कस्य 25 मि. लि. मात्रायां षड्वारं पानं विधेयं प्रतिदिनम्। एवमेव शतपुष्पार्कस्यार्कमकोयस्य च पानमपि श्रेष्ठं भवति। कस्यचिदेकस्य द्वयोर्वाऽर्कयोरेव पानं समुचितम्। भोजने तु 'राबडी' नाम्नी पेया, 'लपटाख्यञ्च' पेयं पेयम्। सन्तरा मौसम्मी-दाडिम, अंगूरेत्यादीनाञ्च फलरसानां सेवनमपि समुचितम्।**

## पेय अधिक पीना चाहिए -

शरद् में उत्पन्न किसी भी ज्वर में पित्तदोष की अधिक मात्रा में स्थिति होती है इसलिए पेयपदार्थ अधिक मात्रा में पीने चाहिए। पेय पदार्थो में तो विशेष रूप से नारियल पानी का और सिकञ्जी नाम वाले निम्बुपानी शर्करासहित को पीना चाहिए। दश संख्या में मुनक्का लेकर गर्म कर के ठण्डे किए गए शुद्ध जल में भिगोकर (डालकर) तीन घण्टे के बाद अच्छी तरह से मसलकर वस्त्र से छानकर उस जल को पीवे। इसी तरह पिण्डखर्जूर लेकर उनसे इसी तरह सिद्ध किया गया ठण्डाजल बार-बार पीना चाहिए। पुनर्नवा से बनाए गए अर्क का 15 मि.ली. की मात्रा में दिन में छः बार पीना चाहिए। इसी तरह सौंफ के अर्क को और मकोय के अर्क को पीना श्रेष्ठ होता है। किसी एक अर्क का या दो अर्को का पान उपयुक्त होता है। भोजन में तो राबडी नाम की पेया और लपटा (एकदम पतला हलुवे की तरह बनाया हुआ) नाम का पेय पीना चाहिए। सन्तरा, मौसम्मी, अनार और अंगूर इत्यादि फलरसों का सेवन भी उपयुक्त रहता है।

## षडङ्गपानीयम्-

**मुस्तगूर्पटकोशीरचन्दनोदीच्यनागरैः।**
**शृतशीतं जलं दद्यात् पिपासाज्वरशान्तये।।**

**एतेषां षट् द्रव्याणां सम्मिलितानां यवकुटरूपेण कुट्टितानां द्वादशग्रामपरिमितायां मात्रायां ग्रहणं कृत्वैकलिटरपरिमिते जले प्रक्षिप्योत्क्वाथ्य 750 परिमितमवशिष्टं जलमवतार्य शीतीकृतं तज्जलं पुनः पुनः पाययेत्। एतद्धि 'षडङ्गपानीयम्' इति संज्ञया सम्बोध्यते। अनेनैव विधिना पञ्चग्राममात्रात्मकं नागरं दशग्रामपरिमितं वा शुष्कं धान्यकं शतपुष्पां वा दश ग्रामपरिमितां गृहीत्वा सम्यक्साधितं जलं स्वल्पं स्वल्पं पुनः पुनः पातव्यम्।**

## षडङ्गपानीय -

नागरमोथा, पित्तपापडा, खस, लालचन्दन, सुगन्ध

बाला और सोंठ इन का उबालकर ठण्डा किया गया जल प्यास और ज्वर की शान्ति के लिए देना चाहिए।

इन छः द्रव्यों को सम्मिलित को जौकुट के रूप में कूटे हुए को 12 ग्राम की मात्रा में लेकर एक लिटर जल में डालकर उबालकर 750 मि.ली. शेष रहने पर उस को उतार कर ठण्डा करके उस जल को बार-बार पिलाना चाहिए। यह 'षडङ्गपानीय' इस संज्ञा से सम्बोधित किया जाता है। इसी विधि से पाँच ग्राम की मात्रा में सोंठ को अथवा 50 ग्राम सूखे धनिये को अथवा दस ग्राम सौंफ को लेकर अच्छी तरह सिद्ध किए गए जल को थोड़ा-थोड़ा करके बार-बार पीना चाहिए।

**सर्वेषु शरदि समुत्पन्नेषु ज्वरेषु प्रयोज्यानां केषाञ्चित्क्वाथयोगानामुल्लेखोऽत्र क्रियते। तेषु कस्यचिदुपयुक्तस्यैकस्य क्वाथयोगस्य प्रयोगो ज्वरे लक्षणानुरूपः करणीयः।**

### अष्टादशाङ्गक्वाथः-

**बिल्व-श्योनाक-गम्भारी-पाटला-अग्निमन्थ-गोक्षुर-कण्टकारि-बृहती-पृश्निपर्णी-शालपर्णी-कर्कटशृंगी-पुष्करमूल-शटी-धमासा ( धन्वमासक ) भार्ङ्गी-इन्द्रयव-पटोलपत्र-कुटकीत्येतानामष्टादश-द्रव्याणां सममात्रायां ग्रहणं कृत्वा यवकुटरूपेण कुट्टितानां सम्मिलितानां विंशति-ग्रामपरिमितायां मात्रायां ग्रहणं कृत्वा चतुः शतमिलि लिटर परिमिते जलं क्वाथं विधाय पातव्यम्। सन्धिशूलपूर्वकं ज्वरेऽस्य प्रयोगो विधेयः।**

शरद ऋतु में उत्पन्न सभी ज्वरों में प्रयोग करने योग्य कुछ क्वाथयोगों का यहाँ उल्लेख किया जा रहा है। उनमें से किसी एक उपयुक्त क्वाथयोग का प्रयोग ज्वर में लक्षणों के अनुरूप करना चाहिए।

### अष्टादशाङ्ग क्वाथ -

बेलगिरी, अरलूछाल, गम्भारी, पाढल, अरणी, गोखरू, छोटी कटेरी, बडी कटेरी, प्रश्निपर्णी, शालपर्णी, काकडासिंगी, पुष्करमूल, कचूर, धमासा, भार्ङ्गी, इन्द्रजौ, परवल के पत्ते और कुटकी इन अठ्ठारह द्रव्यों को समान मात्रा में लेकर जौ कुट के रूप में कूटे हुए को सम्मिलित को 20 ग्राम की मात्रा में लेकर चार सौ मि.लि. जल में क्वाथ बना कर पीना चाहिए। सन्धिशूल वाले ज्वर में इसका प्रयोग करना चाहिए।

### अमृताष्टाकः क्वाथः-

**अमृता-निम्बत्वक्-कुटकी-मुस्तक-इन्द्रयव-नागर-पटोलपत्र-रक्तचन्दनात्मकाना-मेतेषामष्टानां द्रव्याणां सम्मिलितानां विंशतिग्रामपरिमितायां मात्रायां ग्रहणं कृत्वा पूर्ववत्क्वाथो विधेयः। क्वाथस्यास्य पानेन पित्तज्वर-वमनारुचिदाहतृषा-दीनां लक्षणानां शमनं भवति।**

### ज्वरकासान्तकः कल्पितः क्वाथः-

**द्राक्षा-गोजिह्व-वासा-श्लेष्मातक-त्वक्-मधुयष्टी पर्पटक-किराततिक्तक-कुटकी-रक्त-चन्दनात्म-कानामेतेषां दशद्रव्याणां ग्रहणं कृत्वा पूर्ववत् क्वाथं विधाय पानेन ज्वर-कास-श्वास-प्रतिश्यायादीनां शमनं भवति।**

### अमृताष्टक क्वाथ -

गिलोय, नीम की छाल, कुटकी, नागरमोथा, इन्द्रजौ, सोंठ, परवल के पत्ते, लालचन्दन, इन सम्मिलित आठ द्रव्यों को 20 ग्राम की मात्रा में लेकर पूर्व में बताए हुए की तरह क्वाथ बनाना चाहिए। इस क्वाथ के पीने से, पित्तज्वर वमन, अरूचि, दाह, प्यास इत्यादि लक्षणों का शमन होता है।

### ज्वरकासान्तक कल्पित क्वाथ -

मुनक्का, गोजिह्वा, अडूसा, लिसोडा, दालचीनी, मुलहठी, पित्त पापडा, चिरायता, कुटकी और लालचन्दन इन दश द्रव्यों को लेकर पहले बताए हुए की तरह ही क्वाथ बना कर पीने से ज्वर, कास, श्वास, प्रतिश्याय इत्यादि का शमन होता है।

**८०, सेनापति हाउस के पीछे, प्रेमनगर,**
**झोटवाड़ा, जयपुर**

हार्दिक शुभकामनाओं सहित :-

निर्माता

# ए इन्फ्रास्ट्रक्चर लिमिटेड

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत्त एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़ें

# पाञ्चजन्य Organiser

हमारी विशेषताएं

- राष्ट्रीय दृष्टिकोण
- 6 दशकों से लगातार प्रकाशित
- संसद तथा विधान सभाओं को गुंजायमान करने वाला पत्र
- विश्वसनीय प्रतिष्ठित दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई–पेपर की सुविधा

You can subscribe **Panchjanya/Organiser** Weeklies Online
through our **Websites: www.panchjanya.com, www.organiser.org**

**ग्राहक शुल्क भारत में : वार्षिक शुल्क रु. 625/- एवं द्विवार्षिक रु. 1100/-**

विदेशों में (हवाई डाक द्वारा) : वार्षिक शुल्क ... **$ 60**

**Reach millions of consumers through our weeklies**

## भारत प्रकाशन (दिल्ली) लि.

2322, लक्ष्मीनारायण स्ट्रीट, पहाड़गंज, नई दिल्ली-11005 www.organiser.org & www.panchjanya.com
दूरभाष: 011-47642000 से 30 फैक्स: 011-47642015 E-mail: circ@pbdl.in

संस्कृत-समाचारः

# संङ्गोष्ठी वैदिकसम्मेलनं च

राजस्थानसंस्कृतअकादमी-देवस्थानविभागयोः संयुक्ततत्त्वावधाने वैदिक शक्ति संघ द्वारा समायोजितायाः अन्तरराष्ट्रियसंङ्गोष्ठ्या वैदिकसम्मलेनस्य च आयोजनं 8.9.2016 तः 10.9.16 दिनाङ्कपर्यन्तं अभवत् यस्मिन् देशविदेशेभ्यः लब्धप्रतिष्ठाः विद्वांसः वेदेषु शक्तितत्त्वम् विषयमवलम्ब्य स्व-स्व पक्षं प्रस्तुतवन्तः। 8.9.2016 तमे दिवसे आयोजिते उद्घाटन-समारोहे महामहिम-राज्यपाल-महोदयैः श्रीकल्याणसिंहैः सरस्वत्याः पूजनं वेदभगवतश्च पूजनं कृतम्। अस्मिन्नवसरे उच्चशिक्षा-मन्त्रिणः कालीचरणसर्राफमहोदयाः राजस्थान संस्कृत अकादम्याः अध्यक्षा माननीय जया दवे सार्वजनिक प्रन्यासमण्डलस्य अध्यक्षः श्री एस.डी. शर्मा अथ च देशविदेशेभ्यः समागताः विद्वांसः शोधार्थिनश्च उपस्थिता आसन्। कार्यक्रमेऽस्मिन् सोमनाथ संस्कृत विश्व-विद्यालयस्य कुलपतयः प्रो. अर्कनाथ चौधरी महाशयाः वैदिक विद्वांसः प्रो. रूपकिशोरशास्त्री (हरिद्वार) रूसदेशतः आगता वेदविज्ञानिनी तईसा महोदया च वेदेषु शक्तितत्वम् विषये स्वमतं प्रतिपादितवन्तः। सम्पूर्णकार्यक्रमः षट्सत्रेषु आयोजित आसीत् यस्मिन् राष्ट्रिय संस्कृतसंस्थानस्य कुलपतयः प्रो. पी. एन. शास्त्रिणः राष्ट्रियवेदविद्याप्रतिष्ठानस्य सचिवाः प्रो. देवीप्रसादत्रिपाठिनः, तिरुपतिराष्ट्रियसंस्कृत-विद्यापीठस्य प्रो. मुरलीधरः, प्रो. नागसम्पिगे, प्रो. ज्ञानरंजनपण्डा, राष्ट्रपतिपुरस्कार-सभाजिताः देवर्षि कलानाथशास्त्रिणः, प्रो. दयानन्दभार्गवः, प्रो. लक्ष्मीशर्मा, प्रो. विनोदशास्त्री, (कुलपति ज.रा.सं.वि.वि.) प्रो. भास्करशर्मा (प्राचार्यः) प्रो. ओमप्रकाशपाण्डेयः, प्रो. नीरजशर्मा, देहलीस्थ लालबहादुरशास्त्री राष्ट्रियसंस्कृत विश्वविद्यालयस्य डॉ. रामानुजउपाध्याय, डॉ. देवेन्द्रमिश्र, प्रो. प्रकाशपाण्डेय (प्राचार्यः) ईदृशा, राजस्थान प्रान्ततः बहिर्भागतः समागताः विद्वांसः शक्तितत्वस्य विभिन्न-स्वरूपेषु विशिष्ट व्याख्यानं प्रदत्तवन्तः।

9.9.2016 दिनाङ्के राजस्थानस्य यशस्विनी मुख्य-मन्त्रिण्या माननीयायाः वसुन्धराराजेमहोदयायाः मुख्यातिथित्वे कार्यक्रमस्य भव्य-शुभारम्भः राधाष्टक-वैदिक मन्त्रैश्च अभवत्। मुख्यमंत्रीमहोदया शक्तेः विभिन्न-स्वरूपाणि प्रतिपादयंती उक्तवती यत् नारी एव राष्ट्रस्य शक्तिस्वरूपा वर्तते। अतः कन्याभ्रूणनाशः मा भूयात्। ''बेटी बचाओ बेटी पढ़ाओ'' सन्देशञ्च सभायां प्रस्तुतवती। सायंकाले च पं. जयदेवकृत राधाकृष्णगीतस्य नाट्यमञ्चनं वृन्दानतः समागतैः विद्वद्भिः अभवत्। अवसरेऽस्मिन् राज्यमहिलाआयोगस्य अध्यक्षा श्रीमती सुमन शर्मा, रेवासाधामस्य अग्रपीठाधीश्वराः स्वामीराधावाचार्य-वेदान्ती महाशया उपस्थिताः आसन्।

10.09.2016 तमे दिनाङ्के जयपुरस्थसवाई-मानसिंहस्टेडियम इन्वेस्टमेंट ग्राउण्ड इति स्थाने समायोजिते वैदिक सम्मेलनस्य समापन समारोहे पञ्चदशसहस्रसामाजिकानाम् उपस्थितौ 5100 वेदबटुकैः कृतः श्रीसूक्तपाठः, 108 कन्यकानां वैदिकपूजनं गणपति अथर्वशीर्षदेवीअर्थर्वशीर्षादीनां पाठः सुव्यवस्थितरूपेण संजातः। श्रीसूक्तस्य पाठकार्यक्रमः समन्वयकेन डॉ. उमेशदास महोदयेन सम्पादितः। समारोहे पाटलिपुत्रतः समागतेन विपिनमिश्रमहोदयेन शंखनाद-डमरूनादयोश्च भव्यकार्यक्रमः प्रस्तुतः। अस्मिन् वैदिक सम्मेलने न केवलं राजस्थानप्रान्तस्य प्रत्युत सम्पूर्णस्यापि भारतवर्षस्य नैके विद्वांसः संस्कृतज्ञाः, संस्कृतानुरागिणश्च भागं गृहीतवन्तः। समापनसमारोहे नैके मन्त्रिणः, विधायकाः सांसदाश्च धर्मगुरवश्च उपस्थिताः आसन्। कार्यक्रमोऽयं सन्तशिरोमणिब्रह्मपीठाधीश्वर श्रीनारायणदास स्वामि-महोदयानां सान्निध्ये सम्पन्नतामवाप। राजस्थानस्य इतिहासे वैदिक सम्मेलनपरम्परायां अप्रतिमः एषः कार्यक्रमः। आयोजनेऽस्मिन् षट्सहस्राधिकवेदपाठिबटूनां सामाजिकानां च भागग्रहणेन समाजस्य वेदं प्रति सकारात्मकदृष्ट्याः परिचयः मिलति।

सम्पूर्णकार्यक्रमस्य संचालनं राजस्थानस्य मूर्धन्यैः विद्वद्भिः अभवत् येषु पं. अखिलेश शर्मा, प्रो. वाई.एस. रमेश, प्रो. मोहनलालशर्मा, डॉ उमेशप्रसाददाश, डॉ. रघुवीरप्रसादशर्मा, डॉ शिवचरणशर्मा, डॉ. कुलदीपशर्मा, डॉ. अवधेशकुमारशर्मा, प्रमुखा आसन्। उक्तसंगोष्ठ्याः अध्यक्षः श्री एस.डी. शर्मा, उपाध्यक्षा श्रीमती जया दवे सचिवश्च डॉ. रघुवीरप्रसादशर्मादिभिः धन्यवादः ज्ञापितः कार्यक्रमस्य मुख्यप्रेरिका साध्वी प्रीति प्रियंवदा महोदया आसीत् यस्या मार्गनिर्देशकत्वेन सम्पूर्णोऽपि कार्यक्रमः सफलोऽभूत्।

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/429/2015-17

# वैदिकसम्मेलनकार्यक्रमस्य - चित्राणि










स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,